# sA NkhyasAraH

# સાઙ્ખ્યસારઃ

## Document Information

Text title : sAMkhyasAra

File name : sAMkhyasAra.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Source : sAnkhyasaNgrahaH 1918

Latest update : September 15, 2014, October 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# સાઙ્ખ્યસારઃ

પૂર્વભાગઃ ।

પ્રથમઃ પરિચ્છેદઃ ।

મહદાખ્યઃ સ્વયમ્ભૂર્યો જગદઙ્કુર ઈશ્વરઃ ।
સર્વાત્મને નમસ્તસ્મૈ વિષ્ણવે સર્વજિષ્ણવે ॥ ૧॥

સાઙ્ખ્યકારિકયા લેશાદાત્મતત્ત્વં વિવેચિતમ્ ।
સાઙ્ખ્યસારવિવેકોઽતો વિજ્ઞાનેન પ્રપઞ્ચ્યતે ॥ ૨॥

પ્રાયઃ સઙ્કુલિતા સાઙ્ખ્યપ્રક્રિયા કારિકાગણે ।
સાઽતોઽત્ર વર્ણ્યતે લેશાત્ તદનુક્તાંશમાત્રતઃ ॥ ૩॥

સાઙ્ખ્યભાષ્યે પ્રકૃત્યાદેઃ સ્વરૂપં વિસ્તરાન્ મયા ।
પ્રોક્તં તસ્માત્ તદપ્યત્ર સઙ્ક્ષેપાદેવ વક્ષ્યતે ॥ ૪॥

આત્માનાત્મવિવેકસાક્ષાત્કારાત્ કર્તૃત્વાદ્યખિલાભિમાનનિવૃત્ત્યા
તત્કાર્યરાગદ્વેષધર્માધર્માદ્યનુત્પાદાત્ પૂર્વોત્પન્નકર્મણાં
ચાવિદ્યારાગાદિસહકાર્યુચ્છેદરૂપદાનેન વિપાકાનારમ્ભકત્વાત્
પ્રારબ્ધસમાપ્ત્યનન્તરં પુનર્જન્માભાવેન ત્રિવિધદુઃખાત્યન્તનિવૃત્તિરૂપો
મોક્ષો ભવતીતિ શ્રુતિસ્મૃતિડિણ્ડિમઃ । તત્ર શ્રુતયઃ । અથાકામયમાનો
યોઽકામો નિષ્કામો ન તસ્ય પ્રાણા ઉત્ક્રામન્તીહૈવ સમવલીયન્તે ।
આત્માનં ચેદ્વિજાનીયાદયમસ્તીતિ પૂરુષઃ ।
કિમિચ્છન્ કસ્ય કામાય શરીરમનુસઞ્ચરેત્ ॥

યદા સર્વે પ્રમુચ્યન્તે કામા યેઽસ્ય હૃદિ શ્રિતાઃ ।
અથ મર્ત્યોઽમૃતો ભવત્યત્ર બ્રહ્મ સમશ્નુતે ॥

કામાન્ યઃ કામયતે મન્યમાનઃ
સ કર્મભિર્જાયતે તત્ર તત્ર ।
પર્યાપ્તકામસ્ય કૃતાત્મનસ્તુ

ઇહૈવ સર્વે પ્રવિલીયન્તિ કામાઃ ॥

ઇત્યાદ્યાઃ । સ્મૃતયશ્ચ કૌર્માદ્યાઃ । યથા કૌર્મે ।
રાગદ્વેષાદયો દોષાઃ સર્વે ભ્રાન્તિનિબન્ધનાઃ ।
કાર્યો હ્યસ્ય ભવેદ્દોષઃ પુણ્યાપુણ્યમિતિ શ્રુતિઃ ॥

તદ્વશાદેવ સર્વેષાં સર્વદેહસમુદ્ભવઃ ।
ઇતિ । મોક્ષધર્મે ચ ।
ઇન્દ્રિયાણીન્દ્રિયાર્થાશ્ચ નોપસર્પન્ત્યતર્ષુલમ્ ।
હીનશ્ચ કરણૈર્દેહી ન દેહં પુનરર્હતિ ॥

તસ્માત્ તર્ષાત્મકાદ્ રાગાદ્ બીજાજ્જાયન્તિ જન્તવઃ ।
ઇતિ । નનુ રાગાભાવેઽપિ કેવલકર્મવશાન્નરકાદિપ્રાપ્તેઃ કથં રાગસ્ય
કર્મસહકારિત્વં વિપાકારમ્ભ ઉપપન્નમ્ । નરકાદૌ વિશેષતો
રાગાભાવેઽપિ સામાન્યતો રાગસત્ત્વાત્ । નિષિદ્ધસ્ત્ર્યાદિગામિનાં
સ્ત્ર્યાદિરાગાદેવ તપ્તલોહમયનારીસમાલિઙ્ગનાદિરૂપનરકોત્પત્તેઃ ।
યદ્યપ્યવિદ્યાસ્મિતારાગદ્વેષભયાખ્યં ક્લેશપઞ્ચકમેવ જન્માદિવિપાકારમ્ભે
કર્મણાં સહકારિ ભવતિ ।
તદેવ સક્તઃ સહ કર્મણૈતિ
લિઙ્ગં મનો યત્ર નિષિક્તમસ્ય ।
ઇતિ શ્રુતાવભિમાનરાગદ્વેષાદિજન્યસ્ય વિષયવાસનાખ્યસઙ્ગસામાન્યસ્યૈવ
જન્માદિવિપાકારમ્ભે કર્મસહકારિત્વસિદ્ધેઃ ।
યત્ર યત્ર મનો દેહી ધારયેત્ સકલં ધિયા ।
સ્નેહાદ્દ્વેષાદ્ભયાદ્વાઽપિ યાતિ તત્તત્સરૂપતામ્ ॥

ઇત્યાદિસ્મૃતેશ્ચ । તથા ચ ક્લેશમૂલઃ કર્માશયઃ । સતિ મૂલે
તદ્વિપાકો જાત્યાયુર્ભોગા ઇતિ યોગસૂત્રાભ્યામપ્યદૃષ્ટે તદ્વિપાકારમ્ભે
ચ ક્લેશાનાં હેતુત્વવચનાચ્ચ । તથાઽપ્યવિદ્યાસ્મિતાસત્ત્વે
રાગસ્યાવશ્યકત્વાદ્દ્વેષભયયોશ્ચ રાગમૂલકત્વાદ્રાગ એવ મુખ્યતો
જન્માદિહેતુતયા યથોક્તવાક્યૈર્નિર્દિશ્યત ઇતિ । નનુ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્ દૃષ્ટે પરાવરે ।
ઇત્યાદિશ્રુતેર્જ્ઞાનસ્ય પ્રાચીનકર્મનાશકત્વમેવોચિતં દાહકત્વં
કથમિષ્યત ઇતિ ચેન્ન ।
જ્ઞાનાગ્નિદગ્ધકર્માણં તમાહુઃ પણ્ડિતં બુધાઃ ।

ઇત્યાદિવાક્યૈર્દાહસ્યાપિ શ્રવણેન લાઘવાદ્દાહપરત્વસ્યૈવ નાશાદિવાક્યેષ્વપિ
કલ્પનૌચિત્યાત્ । કર્મણાં દાહશ્ચ ક્લેશાખ્યસહકાર્યુચ્છેદેન નૈષ્ફલ્યમ્ ।
કર્મણાં નાશસ્તુ પ્રારબ્ધભોગાન્તે ચિત્તનાશાદેવ ભવિષ્યતિ । અતો
લોકસિદ્ધેનાવિદ્યાનાશેનૈવ દ્વારેણ કર્મફલાનુત્પત્તિસમ્ભવાન્ન જ્ઞાનસ્ય
કર્મનાશકત્વં ગૌરવાદિત્યાદિકં યોગવાર્ત્તિકે પ્રપઞ્ચિતમસ્માભિરિતિ
દિક્ । તસ્માદ્વિવેકસાક્ષાત્કારાદવિદ્યાસ્મિતારાગાદિક્લેશનિવૃત્તૌ
ત્રિવિધદુઃખાત્યન્તનિવૃત્તિરૂપપરમપુરુષાર્થઃ સિદ્ધ્યતીત્યુપપન્નમ્ ।
તથા ચ યોગસૂત્રદ્વયમ્ । હેયં દુઃખમનાગતમ્ । વિવેકખ્યાતિરવિપ્લવા
હાનોપાય ઇતિ ।

ઇતિ શ્રીવિજ્ઞાનભિક્ષુવિરચિતે સાઙ્ખ્યસારેઽભ્યર્હિતત્ત્વાદાદૌ
વિવેકખ્યાતિફલસ્ય પરમપુરુષાર્થસ્ય પરિચ્છેદઃ ॥ * ॥

———————

અથ દ્વિતીયઃ પરિચ્છેદઃ

અથાત્માનાત્મવિવેકજ્ઞાનસ્ય કિં સ્વરૂપં તદુચ્યતે । આત્મા
તાવત્ સુખદુઃખાદ્યનુભવિતેતિ સામાન્યતો લોકપ્રસિદ્ધિઃ અનાત્મા ચ
પ્રકૃત્યાદિર્જડવર્ગઃ તયોરન્યોન્યવૈધર્મ્યેણ પરિણામિત્વાપરિણામિત્વાદિરૂપેણ
દોષગુણાત્મકેન હેયોપાદેયતયા પૃથક્ત્વેન જ્ઞાનં વિવેકજ્ઞાનમ્ ।
તથા ચ શ્રુતિઃ । સ એષ નેતિ નેત્યાત્માઽગૃહ્યો ન હિ ગૃહ્યતેઽશીર્યો
ન હિ શીર્યતેઽસઙ્ગો ન હિ સજ્યતેઽસિતો ન વ્યથતે ન રિષ્યતીત્યાદિ ।
સ્મૃતિશ્ચ ।
સોઽથ પ્રતિનિવૃત્તાક્ષો ગુરુદર્પણબોધિતઃ ।
સ્વતોઽન્યાં વિક્રિયાં મૌઢ્યાદાસ્થિતામઞ્જસૈક્ષત ॥

અથાસૌ પ્રકૃતિર્નાહમિયં હિ કલુષાત્મિકા ।
શુદ્ધબુદ્ધસ્વભાવોઽહમિતિ ત્યજતિ તાં વિદન્ ॥

એવં દેહેન્દ્રિયાદિભ્યઃ શુદ્ધત્વેનાત્મનિ સ્મૃતે ।
નિખિલા સવિકારેયં ત્યક્તપ્રાયાઽહિચર્મવત્ ॥

ઇતિ । સૂત્રં ચ । એવં તત્ત્વાભ્યાસાન્નેતિ નેતીતિ ત્યાગાદ્વિવેકસિદ્ધિરિતિ ।
તત્ત્વજ્ઞાનસ્ય લક્ષણં ચ માત્સ્યે કૃતમ્ ।
અવ્યક્તાદ્યે વિશેષાન્તે વિકારેઽસ્મિંશ્ચ વર્ણિતે ।
ચેતનાચેતનાન્યત્વજ્ઞાનેન જ્ઞાનમુચ્યતે ॥

ઇતિ । યદ્યપ્યન્યોન્યભેદજ્ઞાનમેવ વિવેકજ્ઞાનં તથાપ્યાત્મવિશેષ્યકમેવ તન્મોક્ષકારણં ભવતિ । આત્મા વાઽરે દ્રષ્ટવ્ય ઇત્યાદિ શ્રુતિસ્મૃતિભ્યઃ । નન્વનાત્મન્યાત્મબુદ્ધિરૂપા યાઽવિદ્યા પાતઞ્જલાદિષૂક્તા તસ્યાઃ કથમાત્મવિશેષ્યકવિવેકજ્ઞાનનાશ્યત્વં પ્રકારાદિભેદાદિતિ ચેન્ન । તાદૃશાવિદ્યાયા અનાત્મવિશેષ્યકવિવેકજ્ઞાનદ્વારેણાત્મવિશેષ્યકવિવેકજ્ઞાનનાશ્યત્વાદિતિ । યચ્ચ યોગેન નિર્વિકલ્પકમાત્મજ્ઞાનં જાયતે તદ્વિવેકજ્ઞાનદ્વારૈવ મોક્ષકારણં ભવતિ ન તુ સાક્ષાદવિદ્યાનિવર્તકત્વાભાવાત્ । અહં ગૌરઃ કર્તા સુખી દુઃખીત્યાદિ જ્ઞાનમેવ હ્યવિદ્યા સંસારાનર્થહેતુતયા શ્રુતિસ્મૃતિન્યાયસિદ્ધા તસ્યાશ્ચ નિવર્તિકા નાહં ગૌર ઇત્યાદિરૂપા વિવેકખ્યાતિરેવ ભવતિ । સમાને વિષયે ગ્રાહ્યાભાવત્વપ્રકારકગ્રાહ્યાભાવજ્ઞાનત્વેનૈવ વિરોધાત્ । અન્યથા શુક્તનિર્વિકલ્પકસ્યાપિ ઇદં રજતમિતિ જ્ઞાનવિરોધિત્વાપત્તેઃ । કિઞ્ચ યતોક્તાભાવજ્ઞાને ગ્રાહ્યજ્ઞાનવિરોધિત્વસ્યાવશ્યકતયા નિર્વિકલ્પકજ્ઞાનસ્ય ભ્રમનિવર્તકત્વં ન પૃથક્ કલ્પ્યતે ગૌરવાત્ । અપિ ચાથાઽત આદેશો નેતિ નેતિ ન હ્યેતસ્માદિતિ નેત્યન્યત્ પરમસ્તીત્યાદિશ્રુત્યા વિવેકોપદેશાપેક્ષયોત્તમોપદેશો નાસ્તીત્યુચ્યતે ।

ક્ષેત્રક્ષેત્રજ્ઞયોરેવમન્તરં જ્ઞાનચક્ષુષા ।
ભૂતપ્રકૃતિમોક્ષં ચ યે વિદુર્યાન્તિ તે પરમ્ ॥

ઇતિ ગીતાદિવાક્યૈશ્ચ વિવેકજ્ઞાનસ્યૈવ મોક્ષહેતુત્વમુચ્યતે । અતો વિવેકજ્ઞાનમેવ સાક્ષાદવિદ્યાનિવૃત્ત્યા મોક્ષહેતુઃ । યોગેન કેવલાત્મસાક્ષાત્કારસ્તુ યોગ્યાનુપલબ્ધિવિધયોપાધ્યાદિગતધર્માભાવમુપાધ્યાદિભેદં ચ ગ્રાહયતિ તતોઽવિદ્યાનિવૃત્તિરિતિ । એતેન સર્વભૂતેષુ સમતાજ્ઞાનમાત્મનઃ સર્વાત્મકત્વાદિજ્ઞાનં ચ શ્રુતિસ્મૃત્યોર્ગીયમાનં વિવેકજ્ઞાનસ્યૈવ શેષભૂતં સર્વદર્શનેષુ મન્તવ્યમ્ । જ્ઞાનાન્તરાણાં સાક્ષાદભિમાનાનિવર્તકત્વાત્ । બ્રહ્મમીમાંસાયાં ત્વયં વિશેષો યત્ પરમાત્મવિવેકશેષત્વમ્ । સાઙ્ખ્યશાસ્ત્રે તુ સામાન્યાત્મવિવેકશેષત્વમિતિ દિક્ । નનુ યથોક્તવિવેકખ્યાતિતોઽપ્યત્યન્તમવિદ્યોચ્છેદો ન ઘટતે । વિવેકખ્યાતેરવિદ્યાપ્રતિબન્ધકત્વમાત્રત્વેન વિવેકખ્યાતિનાશોત્તરં

પુનરભિમાનસમ્ભવાત્ । શુક્તિરજતવિવેકદર્શિનોઽપિ કાલાન્તરે શુક્તૌ રજતભ્રમવદિતિ । મૈવમ્ । દૃષ્ટાન્તવૈષમ્યાત્ । શુક્ત્યાદિષુ જાતેઽપિ સાક્ષાત્કારે દૂરત્વાદિરૂપવિષયદોષાણાં પટલાદિરૂપકરણદોષાણાં ચોત્પત્તિસમ્ભવેન પુનર્ભ્રમો યુક્તઃ । અનાત્મન્યાત્માભિમાને ત્વનાદિવાસનૈવ દોષઃ સર્વાસ્તિકસમ્મતઃ જાતમાત્રસ્યાભિમાને દોષાન્તરાનુપલબ્ધેઃ । સા મિથ્યાજ્ઞાનવાસના યદા વિવેકખ્યાતિપરમ્પરાજન્યદૃઢવાસનોન્મૂલિતા તદૈવ વિવેકસાક્ષાત્કારનિષ્ઠોચ્યતે । તત્પૂર્વમવશ્યં વાસનાલેશતો મિથ્યાંશસ્ય કસ્યાપ્યાત્મનિ ભાવાત્ તસ્યાં ચ વિવેકખ્યાતિનિષ્ઠાયાં જાતાયાં ન પુનરભિમાનઃ સમ્ભવતિ વાસનાખ્યદોષાભાવાદિતિ તુ મહદ્વૈષમ્યમ્ । યદિ તુ બુદ્ધિપુરુષયોરન્યોન્યપ્રતિબિમ્બનાદિકમવિવેકકારણં દોષ ઇષ્યતે તદા તુ તદ્દોષં બાધિત્વૈવ વિવેકસાક્ષાત્કાર ઉદિત ઇતિ ન તસ્ય પુનર્ભ્રમહેતુત્વં ફલબલેન યોગજધર્માસહકૃતસ્યૈવ તસ્ય દોષત્વકલ્પનાસમ્ભવાદિતિ ।
વિવેકખ્યાતિનિષ્ઠા ચ ગીતાદિષુ લક્ષિતા ।

પ્રકાશં ચ પ્રવૃત્તિં ચ મોહમેવ ચ પાણ્ડવ ।
ન દ્વેષ્ટિ સમ્પ્રવૃત્તાનિ ન નિવૃત્તાનિ કાઙ્ક્ષતિ ॥

ઉદાસીનવદાસીનો ગુણૈર્યો ન વિચાલ્યતે ।
સર્વારમ્ભપરિત્યાગી ગુણાતીતઃ સ ઉચ્યતે ॥

ઇતિ । ગુણાતીતો નિવૃત્તગુણાભિમાનઃ । અધિકં તુ જ્ઞાનિલક્ષણમગ્રે વક્ષ્યામઃ । નન્વેવમપિ વિવેકપ્રતિયોગિપદાર્થાનામાનન્ત્યેન પ્રાતિસ્વિકરૂપૈઃ સર્વપદાર્થેભ્યો વિવેકગ્રહાસમ્ભવાત્ કથં વિવેકખ્યાતેર્મોક્ષહેતુત્વમિતિ ચેન્ન । દૃશ્યત્વપરિણામિત્વાદિસામાન્યરૂપૈર્વિવેકગ્રહસમ્ભવાત્ । તથા હિ । દ્રષ્ટા સ્વસાક્ષાત્પ્રકાશેભ્યો ભિન્નઃ પ્રકાશકત્વાદ્યો યસ્ય પ્રકાશકઃ સ તસ્માદ્ભિન્નઃ યથા ઘટાદાલોકો વૃત્તિપ્રકાશ્યાચ્ચ વૃત્તિરિત્યનુમાનેનાદાવન્તર્દૃશ્યેભ્યો બુદ્ધિવૃત્તિતદારૂઢાર્થેભ્યો વિવેકતો બુદ્ધીસાક્ષી સિધ્યતિ । કર્મકર્તૃવિરોધશ્ચાનુકૂલસ્તર્કઃ । અત્ર આત્મનિ વ્યભિચારવારણાય સાક્ષાત્પદમ્ । વૃત્તિદ્વારૈવાત્મનઃ સ્વવિષયત્વાત્ । નન્વત્રાનુમાને બુદ્ધિવૃત્તિમાત્રાદ્વિવેકઃ સિધ્યતુ । તસ્યા એવ સાક્ષદાત્મદૃશ્યત્વાત્ ન પ્રકૃત્યાદિભ્ય ઇતિ ચેન્ન । વૃત્તીનામજ્ઞાતસત્ત્વાભાવેન હ્યત્રાનુમાને લાઘવાદ્વક્ષ્યમાણતર્કગણાચ્ચાખિલવૃત્તીનાં દ્રષ્ટા વિભુકૂટસ્થનિત્યૈકજ્ઞાનસ્વરૂપતયૈવ સિધ્યતિ । યથા નૈયાયિકાનાં

ક્ષિતિઃ સકર્તૃકા કાર્યત્વાદિત્યનુમાને લાઘવાત્ કર્તુરેકત્વનિત્યત્વાદિકં તદ્વત્ । તત્ર વિભુત્વં પરિચ્છિન્નભિન્નત્વં કૂટસ્થત્વાદિકત્વં ચ પરિણામિભિન્નત્વાદિકમતો બુદ્ધ્યાત્મનોર્દૃગ્દૃશ્યરૂપતો વિવેકગ્રહે સતિ તદુત્તરાનુમાનેન પરિણામિત્વાપરિણામિત્વાદિરૂપૈઃ સામાન્યતોઽપ્યાત્માનાત્મવિવેકગ્રહો ઘટત ઇતિ । અતએવ પાતઞ્જલે સત્ત્વપુરુષાન્યતાખ્યાતિરેવ મોક્ષહેતુતયા સ્થલે સ્થલે વ્યાસભાષ્યે પ્રોક્તા । સત્ત્વપુરુષાન્યતાખ્યાતિરૂપદૃગ્દૃશ્યવિવેકગ્રહોત્તરં યથોક્તરીત્યા પ્રકૃત્યાદિવિવેકગ્રહાત્ । તત્ર ચ સત્ત્વશબ્દે બુદ્ધિસ્થત્વેન બુદ્ધિસત્ત્વમુક્તમિતિ । એવં ચ પ્રકૃત્યાદિપદાર્થાનાં વિશિષ્યજ્ઞાનાભાવેઽપિ તદ્વિવેકજ્ઞાનં ઘટતે । એતેન દૃગ્દૃશ્યવિવેકાદવિદ્યાનિવૃત્તિરિતિ પ્રાચાં પ્રવાદોઽપ્યુપપાદિતઃ । કિઞ્ચાત્મા પ્રકૃતિતત્કાર્યેભ્યો ભિન્નોઽપરિણામિત્વાદિત્યાદ્યનુમાનૈરપિ સામાન્યતો દૃશ્યવિવેકો દ્રષ્ટરિ સમ્ભવતીતિ । યત્ત્વાધુનિકા વેદાન્તિબ્રુવા દૃશ્યત્વેનૈવ પ્રકૃત્યાદીનાં દ્રષ્ટૃત્વેન ચ પ્રકૃત્યાદ્યખિલજડેભ્ય આત્મવિવેકં મન્યન્તે ।

ઘટદ્રષ્ટા ઘટાદ્ભિન્નઃ સર્વથા ન ઘટો યથા ।
દેહદ્રષ્ટા તથા દેહો નાહમિત્યાદિરૂપતઃ ॥

તન્ન । આત્મા વાઽરે દ્રષ્ટવ્ય ઇત્યાદિશ્રુતિભિરાત્મનોઽપિ દૃશ્યત્વાત્ સાક્ષાદ્દૃશ્યત્વવિવક્ષયા ચ પ્રકૃત્યાદેરસઙ્ગ્રહાત્ કરણદ્વારૈવ તદ્દર્શનાત્ । અથૈવં કલ્પનીયં આત્મનો વૃત્તિવ્યાપ્યત્વમેવ દૃશ્યત્વં શ્રુત્યાદિભિર્વિધીયતે ન તુ પ્રકાશ્યત્વરૂપફલવ્યાપ્યત્વમ્ । સ્વયમ્પ્રકાશસ્વરૂપસ્ય પ્રકાશાપેક્ષાવિરહાત્ । અતોઽત્ર દૃશ્યત્વં પ્રકાશ્યત્વં તચ્ચાત્મનિ નાસ્તીતિ તદપિ તુચ્છમ્ । યથા હ્યહમિત્યનુભૂયમાનોઽપ્યાત્મા ચૈતન્યાખ્યફલવ્યાપ્યો ન ભવતીતિ ભવદ્ભિરુચ્યતે તથૈવ બૌદ્ધૈરપીષ્યતે સુખદુઃખાદિમત્ત્વેનાપિ બુદ્ધિઃ સ્વપ્રકાશતયા ચૈતન્યવ્યાપ્યા ન ભવતીતિ । તથા ચાત્મનીવ બુદ્ધાવપિ દૃશ્યત્વાસિદ્ધ્યા દૃશ્યત્વેન રૂપેણ બુદ્ધિવિવેકોઽત્યન્તાપેક્ષિતોઽપિ ન સિધ્યતીતિ ભાષ્યાદિષુ ચાન્યાન્યત્ર દૂષણાન્યુક્તાનીતિ દિક્ । નનુ સમ્ભવત્યેવં સામાન્યરૂપેણ વિવેકગ્રહઃ । તથાપિ સામાન્યાન્યેવ બહૂનિ સન્તિ પરિણામિત્વસંહત્યકારિત્વસુખદુઃખમોહાત્મકત્વચતુર્વિંશતિતત્ત્વત્વાદીન્યતસ્તૈસ્તૈ રૂપૈર્વિવેકગ્રહાણાં મોક્ષહેતુત્વેઽનનુગમદોષ ઇતિ ચેન્ન ।

અભિમાનપ્રતિબન્ધકજ્ઞાનત્વેનૈવાનુગમાદિતિ । અથૈવં સામાન્યરૂપેણ વિવેકસ્યૈવ સર્વાભિમાનનિવર્તકતયા નાહં દેહો નેન્દ્રિયાણિત્યાદિપ્રત્યેકરૂપૈર્વિવેકગ્રહાણાં મોક્ષહેતુત્વં શ્રુતિસ્મૃત્યોરુચ્યમાનં કથં ઘટેતેતિ ચેન્ન । અવાન્તરવિવેકાનાં સામાન્યવિવેકપ્રપઞ્ચમાત્રત્વાદિતિ ॥

ઇતિ શ્રીવિજ્ઞાનભિક્ષુવિરચિતે સાઙ્ખ્યસારે મોક્ષહેતુવિવેકજ્ઞાનસ્ય સ્વરૂપસ્ય પરિચ્છેદઃ ॥ *॥

———————

અથ તૃતીયઃ પરિચ્છેદઃ ।

અથ કે તે પ્રકૃત્યાદયો યેભ્યઃ પુરુષો વિવેચનીય ઇત્યુચ્યતે ।
પ્રકૃતિર્બુદ્ધ્યહઙ્કારૌ તન્માત્રૈકાદશેન્દ્રિયમ્ ।
ભૂતાનિ ચેતિ  સામાન્યાચ્ચતુર્વિંશતિરેવ તે ॥

એતેષ્વેવ ધર્મધર્મ્યભેદેન ગુણકર્મસામાન્યાનામન્તર્ભાવઃ । તત્ર પ્રકૃતિત્વં સાક્ષાત્ પરમ્પરયાઽખિલવિકારોપાદાનત્વં પ્રકૃષ્ટાકૃતિઃ પરિણામરૂપાઽસ્યા ઇતિ વ્યુત્પત્તેઃ । પ્રકૃતિઃ શક્તિરજા પ્રધાનમવ્યક્તં તમો માયાઽવિદ્યેત્યાદયઃ પ્રકૃતેઃ પર્યાયાઃ ।
બ્રાહ્મીતિ વિદ્યાઽવિદ્યેતિ માયેતિ ચ તથા પરે ।
પ્રકૃતિશ્ચ પરા ચેતિ વદન્તિ પરમર્ષયઃ ॥

ઇતિ સ્મૃતેઃ । સા ચ સામ્યાવસ્થયોપલક્ષિતં સત્ત્વાદિદ્રવ્યત્રયમ્ । કાર્યસત્ત્વાદિવારણાયોપલક્ષિતાન્તમ્ । સામ્યાવસ્થા ચ ન્યૂનાધિકભાવેનાસંહનનાવસ્થા અકાર્યાવસ્થેતિ યાવત્ । મહદાદિકં તુ કાર્યસત્ત્વાદિકં ન કદાઽપ્યકાર્યાવસ્થં ભવતીતિ તદ્વ્યાવૃત્તિઃ । વૈષમ્યાવસ્થાયામપિ પ્રકૃતિત્વસિદ્ધ્ય ઉપલક્ષિતમિત્યુક્તમ્ । અકાર્યમિતિ તૂપલક્ષિતાન્તસ્ય નિષ્કૃષ્ટાર્થઃ । સત્ત્વાદિગુણવતી સત્ત્વાદ્યતિરિક્તા પ્રકૃતિરિતિ ન શઙ્કનીયમ્ । સત્ત્વાદીનામતદ્ધર્મત્વં તદ્રૂપત્વાદિતિ સાઙ્ખ્યસૂત્રેણ સત્ત્વાદીનાં પ્રકૃતિસ્વરૂપહેતુના પ્રકૃતિધર્મત્વપ્રતિષેધાત્ । યોગસૂત્રતદ્ભાષ્યાભ્યામપિ ગુણાનામેવ પ્રકૃતિત્વવચનાચ્ચ । ગુણેભ્ય એવ કાર્યોત્પત્તૌ તદન્યપ્રકૃતિકલ્પનાવૈયર્થ્યાચ્ચ । પ્રકૃતેર્ગુણા ઇત્યાદિવાક્યં તુ વનસ્ય વૃક્ષા ઇતિવદ્ બોધ્યમ્ ।

સત્ત્વં રજસ્તમ ઇતિ પ્રકૃતેરભવન્ ગુણાઃ ।
ઇતિ સત્ત્વાદીનાં પ્રકૃતિકાર્યત્વવચનં તુ ગુણનિત્યતાવાક્યવિરોધેન
મહત્તત્ત્વકારણીભૂતકાર્યસત્ત્વાદિપરમેવ । મહદાદિસૃષ્ટિર્હિ
ગુણવૈષમ્યાત્ શ્રૂયતે । તચ્ચ વૈષમ્યં સજાતીયસવલનેન
ગુણાન્તરવ્યાવૃત્તપ્રકાશાદિફલોપહિતઃ સત્ત્વાદિવ્યવહારયોગ્યઃ
પરિણામ ઇતિ । એતેનાષ્ટાવિંશતિતત્ત્વપક્ષોઽપ્યુપપાદિતો મન્તવ્યઃ ।
વૈષમ્ય એવ સત્ત્વાદિવ્યવહારશ્ચ શ્રુતૌ દૃશ્યતે । યથા તમ
એવેદમગ્ર આસ તત્પરેણેરિતં વિષમત્વં પ્રયાત્યેતદ્ વૈ રજસો
રૂપં ખલ્વીરિતં વિષમત્વં પ્રયાત્યેતદ્ વૈ સત્ત્વસ્ય રૂપમિતિ ।
સત્ત્વાદિત્રયં ચ સુખપ્રકાશલાઘવપ્રસાદાદિગુણવત્તયા ।
સંયોગવિભાગાદિમત્તયાઽનાશ્રિતત્વોપાદાનત્વાદિના ચ દ્રષ્ટવ્યેઽપિ
પુરુષોપકરણત્વાત્ પુરુષબન્ધકત્વાચ્ચ ગુણશબ્દેનોચ્યતે ।
ઇન્દ્રિયાદિવત્ । ગુણાનાં સુખદુઃખમોહાત્મકત્વપ્રવાદસ્તુ
ધર્મધર્મ્યભેદાત્ । મનસઃ સઙ્કલ્પાત્મકત્વવત્ । તત્ર સત્ત્વં
સુખપ્રસાદપ્રકાશાદ્યનેકધર્મકં પ્રાધાન્યતસ્તુ સુખાત્મકમુચ્યતે ।
એવં રજોઽપિ દુઃખકાલુષ્યપ્રવૃત્ત્યાદ્યનેકધર્મકં પ્રાધાન્યતસ્તુ
દુઃખાત્મકમુચ્યતે । તથા તમોઽપિ મોહાવરણસ્તમ્ભનાદ્યનેકધર્મકં
પ્રાધાન્યતસ્તુ મોહાત્મકમુચ્યતે । ત એવ ધર્માસ્તેષાં લક્ષણાનિ
ભવન્તિ । સત્ત્વાદિસઞ્જ્ઞા ચાન્વર્થા । સતો ભાવઃ સત્ત્વમુત્તમત્વમિતિ
વ્યુત્પત્ત્યા હિ ધર્મપ્રાધાન્યેનોત્તમં પુરુષોપકરણં સત્ત્વશબ્દાર્થઃ ।
મધ્યમં ચ રજઃશબ્દાર્થો રાગયોગાત્ । અધમં ચ તમઃશબ્દાર્થઃ ।
અધર્માવરણયોગાત્ । તાનિ ચ સત્ત્વાદીનિ પ્રત્યેકમસઙ્ખ્યવ્યક્તયઃ ।
લઘુત્વાદિધર્મૈરન્યોન્યસાધર્મ્યં વૈધર્મ્યં ચ ગુણાનામિતિ સાઙ્ખ્યસૂત્રાત્ ।
અત્ર હિ સૂત્રે લઘુત્વાદિના બહૂનાં સત્ત્વાનાં સાધર્મ્યં તેનૈવ રજસ્તમોભ્યાં
વૈધર્મ્યમ્ । એવં ચલત્વાદિના ગુરુત્વાદિના ચ બહૂનાં રજસાં બહૂનાં ચ
તમસાં તદુભયમુક્તમિતિ । કિઞ્ચ યદિ સત્ત્વાદિત્રયમેકૈકવ્યક્તિરેવ સ્યાત્
તત્ ત્રયં વિભ્વેવ વક્તવ્યમ્ । એકદાઽનેકબ્રહ્માણ્ડાદિસૃષ્ટિશ્રવણાત્ । તથા
ચ કાર્યાણામનન્તવૈચિત્ર્યં ન ઘટતે । ન ચ સંયોગવૈચિત્ર્યાદ્વૈચિત્ર્યં
સ્યાદિતિ વાચ્યમ્ । વિભૂનાં ત્રયાણાં ગુણાનાં સ્વતઃ સંયોગવૈચિત્ર્યાસમ્ભવાત્ ।
દ્રવ્યાન્તરસ્ય ચાવચ્છેદકીભૂતસ્યાભાવાદિતિ । તસ્માત્
સત્ત્વાદીન્યસઙ્ખ્યવ્યક્તિકાન્યેવ દ્રવ્યાણિ । તેષુ ત્રિત્વવચનં તુ
સત્ત્વત્વાદિવિભાજકોપાધિત્રયેણ વૈશેષિકાણાં નવદ્રવ્યવચનવદિતિ

સિદ્ધમ્ । તાનિ ચ સત્ત્વાદીનિ યથાયોગ્યમણુવિભુપરિમાણકાનિ ।
અન્યથા રજસશ્ચલસ્વભાવત્વવચનવિરોધાત્ । આકાશકારણત્વસ્ય
ચ વિભુત્વૌચિત્યાત્ । સર્વેષાં કારણદ્રવ્યાણાં વિભુત્વે કાર્યાણાં
પરિચ્છિન્નત્વાનુપપત્તેશ્ચ । નન્વેવં વૈશેષિકોક્તાન્યેવ પાર્થિવાણ્વાદીનિ
પ્રકૃતિરિત્યાયાયમિતિ ચેન્ન । ગન્ધાદિગુણશૂન્યત્વેન કારણદ્રવ્યેષુ
પૃથિવીત્વાદ્યભાવતોઽસ્માકં વિશેષાત્ । તદુક્તં વિષ્ણુપુરાણાદિષુ ॥

અવ્યક્તં કારણં યત્ તત્ પ્રધાનમૃષિસત્તમૈઃ ।
પ્રોચ્યતે પ્રકૃતિઃ સૂક્ષ્મા નિત્યં સદસદાત્મકમ્ ॥

શબ્દસ્પર્શવિહીનં તદ્રૂપાદિભિરસંયુતમ્ ।
ત્રિગુણં તજ્જગદ્યોનિરનાદિપ્રભવાપ્યયમ્ ॥

ઇત્યાદિના ।
વૈશેષિકાણાં કારણદ્રવ્યેષુ ગન્ધાદ્યનુમાનં
તુ ભાષ્યેઽસ્માભિર્નિરાકૃતમ્ । અથૈવમપિ
પ્રકૃતેરણુવિભુસાધારણસત્ત્વાદ્યનેકવ્યક્તિરુપત્વેઽપરિચ્છિન્નત્વૈકત્વાક્રિયત્વસિદ્ધાન્તક્ષતિરિતિ
મૈવમ્ । કારણદ્રવ્યત્વરૂપપ્રકૃતિત્વેનૈવાપરિચ્છિન્નત્વવચનાત્ ।
ગન્ધત્વેન ગન્ધાનાં પૃથિવીવ્યાપકતાવત્ । આકાશાદિપ્રકૃતીનાં
વિભુત્વેનૈવ પ્રકૃતિવિભુત્વસિદ્ધાન્તોપપત્તેશ્ચ । તથા
પુરુષભેદેન સર્ગભેદેન ચ ભેદાભાવસ્યૈવૈકશબ્દાર્થત્વાત્ ।
અજામેકામિતિ શ્રુતિતસ્તથાઽવગમાત્ ।
અથાધ્યવસાયાભિમાનાદિક્રિયારાહિત્યસ્યૈવાક્રિયશબ્દાર્થત્વાત્ ।
અન્યથા શ્રુતિસ્મૃતિષૂક્તસ્ય પ્રકૃતિક્ષોભસ્યાનુપપત્તેરિતિ ।
પ્રકૃતિગતાશ્ચાપરે વિશેષા ભાષ્યે દ્રષ્ટવ્યાઃ । પ્રકૃત્યનુમાનં ચેદમ્ ।
સુખદુઃખમોહાત્મકં મહદાદિકાર્યં સુખદુઃખમોહાત્મકદ્રવ્યકાર્યં
સુખદુઃખમોહાત્મકત્વાત્ વસ્ત્રાદિકાર્યશય્યાદિવદિતિ । શ્રુતિસ્મૃતી
ચાત્રાનુગ્રાહકસ્તર્કઃ । એવં સામાન્યતોઽનુમિતાયાઃ પ્રકૃતેર્વિશેષાઃ
શાસ્ત્રાદ્યોગાચ્ચાવગન્તવ્યાઃ । અનુમાનસ્ય સામાન્યમાત્રવિષયકત્વાત્ ।
નન્વન્તરેવ સુખાદિકમુપલભ્યતે બાહ્યવસ્તુષુ સુખાદૌ કિં પ્રમાણં યેન
દૃષ્ટાન્તતા સ્યાદિતિ । ઉચ્યતે । અન્તઃકરણસ્ય સુખાદિહેતુતયા વિષયેષુ
સુખાદિકં સિધ્યતિ । ન ચ રૂપાદિગતોત્તમત્વાદિકમેવ સુખાદ્યુત્પાદને
નિયામકમ્ । ઉત્તમત્વાદેર્જાતિરૂપત્વે નીલત્વપીતત્વાદિના જાતિસાઙ્કર્યાપત્તેઃ ।
કાલાદિભેદૈરેકસ્યા એવ રૂપવ્યક્તેઃ સુખદુઃખોત્પાદકત્વાચ્ચ ।

અતઃ સુખાદિમત્ત્વમેવોત્તમત્વાદિકમ્ । કિઞ્ચ ઘટરૂપમિતિ પ્રત્યયવત્ સ્ત્રીસુખં ચન્દનસુખમિત્યાદિપ્રત્યયાદપિ વિષયે સુખાદ્યુચિતમ્ । અધિકં તુ ભાષ્યે દ્રષ્ટવ્યમ્ । તદેવં પ્રકૃતિર્નિરૂપિતા । મહત્તત્ત્વં નિરૂપ્યતે । પ્રકૃતેઃ સકાશાદ્બુદ્ધ્યાખ્યં મહત્તત્ત્વં જાયતે । તસ્ય ધર્માદિરૂપપ્રકૃષ્ટગુણયોગાન્ મહત્સઞ્જ્ઞા તદેવ ચ લક્ષણમ્ । મહાન્ બુદ્ધિઃ પ્રજ્ઞેત્યાદયશ્ચ તસ્ય પર્યાયાઃ । તથા ચોક્તમનુગીતાયામ્ ।
મહાનાત્મા મતિર્વિષ્ણુર્જિષ્ણુઃ શમ્ભુશ્ચ વીર્યવાન્ ।
બુદ્ધિઃ પ્રજ્ઞોપલબ્ધિશ્ચ તથા બ્રહ્મા ધૃતિઃ સ્મૃતિઃ ॥

પર્યાયવાચકૈરેતૈર્મહાનાત્મા નિગદ્યતે ।
સર્વતઃ પાણિપાદશ્ચ સર્વતોઽક્ષિશિરોમુખઃ ॥

સર્વતઃ શ્રુતિમાંલ્લોકે સર્વં વ્યાપ્ય સ તિષ્ઠતિ ।
અણિમા લઘિમા પ્રાપ્તિરીશાનો જ્યોતિરવ્યયઃ ॥

જ્ઞાનવન્તશ્ચ યે કેચિદલુબ્ધા જિતમન્યવઃ ।
વિમુક્તાઃ સર્વ એવૈતે મહત્ત્વમુપયાન્ત્યુત ।
વિષ્ણુરેવાદિસર્ગેષુ સ્વયમ્ભૂર્ભવતિ પ્રભુઃ ॥

ઇતિ । અત્ર સત્ત્વાદ્યંશત્રયેણ મહતો દેવતાત્રયોપાધિત્વાત્ તદવિવેકેન બ્રહ્મવિષ્ણુશિવત્વવચનમ્ । તદુક્તં વિષ્ણૌ ।
સાત્ત્વિકો રાજસશ્ચૈવ તામસશ્ચ ત્રિધા મહાન્ ।
ઇતિ । માત્સ્યે ચ ।
સવિકારાત્ પ્રધાનાત્ તુ મહત્તત્ત્વમજાયત ।
મહાનિતિ યતઃ ખ્યાતિર્લોકાનાં જાયતે સદા ॥

ગુણેભ્યઃ ક્ષોભ્યમાણેભ્યસ્ત્રયો દેવા વિજજ્ઞિરે ।
એકા મૂર્તિસ્ત્રયો દેવા બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥

ઇતિ । અણિમેત્યાદિભાવનિર્દેશો ધર્મધર્મ્યભેદાત્ । બ્રહ્મશઙ્કરાપેક્ષયાઽપ્યાદૌ વિષ્ણુરૂપેણૈવ મહાનાવિર્ભવતીતિ વિષ્ણુરેવેત્યર્ધેનોક્તમ્ । એકમેવ મહત્તત્ત્વમંશતો રજસ્તમઃસમ્ભેદેન પરિણતં સદ્ વ્યષ્ટિજીવાનામુપાધિરધર્માદિયુક્તં ક્ષુદ્રમપિ ભવતિ । મહદુપરાગાદ્વિપરીતમિતિ સાઙ્ખ્યસૂત્રાત્ । મહત્તત્ત્વસ્ય પ્રાધાન્યેનાસાધારણ્યેન ચાધ્યવસાયો વૃત્તિઃ । મહદહઙ્કારમનસ્ત્રિતયાત્મકસ્યાન્તઃકરણસ્ય મહત્તત્ત્વં બીજાવસ્થેતિ ।

અત્ર પ્રકૃતેર્મહાન્ મહતોઽહઙ્કાર ઇત્યાદિસૃષ્ટિક્રમે શાસ્ત્રમેવ પ્રમાણમ્ ।
અનુમાનેન સામાન્યતઃ કાર્યાણાં સકારણકત્વમાત્રસિદ્ધેઃ ન તુ સૃષ્ટૌ
ભૂતાદિક્રમો વાઽન્તઃકરણાદિક્રમો વેત્યેકતરવધારકમનુમાનં સમ્ભવતિ ।
સ્પષ્ટલિઙ્ગાભાવાત્ । શ્રુતિસ્મૃત્યનુગૃહીતં યથાકથઞ્ચિલ્લિઙ્ગં તુ
મહદાદિક્રમેઽસ્તીતિ ભાષ્યેઽસ્માભિઃ પ્રદર્શિતમ્ । મહત્તત્ત્વં નિરૂપિતમ્ ।
અહઙ્કારો નિરૂપ્યતે । મહત્તત્ત્વાદહઙ્કાર ઉત્પદ્યતે । અઙ્કુરાત્ શાખાવત્ ।
તસ્ય ચાભિમાનવૃત્તિકત્વાદહઙ્કારસઞ્જ્ઞા । કુમ્ભકારસઞ્જ્ઞાવત્ ।
તદેવ લક્ષણમ્ । તસ્ય ચ પર્યાયાઃ કૌર્મે પ્રોક્તાઃ ।
અહઙ્કારોઽભિમાનઞ્ચ કર્તા મન્તા ચ સંસ્મૃતઃ ।
આત્મા ચ પ્રકુલો જીવો યતઃ સર્વાઃ પ્રવૃત્તયઃ ॥

ઇતિ । સ ચાહઙ્કારસ્ત્રિવિધતયા ત્રિવિધકાર્યહેતુઃ । તદુક્તં કૌર્મે ।
વૈકારિકસ્તૈજસશ્ચ ભૂતાદિશ્ચૈવ તામસઃ ।
ત્રિવિધોઽયમહઙ્કારો મહતઃ સમ્બભૂવ હ ॥

તૈજસાદિન્દ્રિયાણિ સ્યુર્દેવા વૈકારિકાદ્દશ ।
એકાદશં મનશ્ચાત્ર સ્વગુણેનોભયાત્મકમ્ ॥

ભૂતતન્માત્રસર્ગસ્તુ ભૂતાદેરભવન્ પ્રજાઃ ।
ઇતિ । વૈકારિકઃ સાત્ત્વિકઃ । તૈજસો રાજસઃ । સ્વગુણેનિન્દ્રિયવૃત્તિષુ
સાહાય્યરૂપેણોત્કર્ષેણ । ઉભયાત્મકં જ્ઞાનકર્મોભયેન્દ્રિયાત્મકમ્ ।
અન્યત્રમના અભૂવં નાઽશ્રૌષમિત્યાદિશ્રુત્યા મનસો
જ્ઞાનકર્મોભયેન્દ્રિયસહકારિત્વસિદ્ધેરિતિ । એકાદશેન્દ્રિયદેવાશ્ચ ।
દિગ્વાતાર્કપ્રચેતોશ્વિવહ્નીન્દ્રોપેન્દ્રમિત્રકાઃ ।
ચન્દ્રશ્ચ
ઇતિ । અહઙ્કારો નિરૂપિતઃ । ઇન્દ્રિયાદીનિ નિરૂપ્યન્તે । અહઙ્કારાદાદૌ મન
ઉત્પદ્યતે ।
શબ્દરાગાચ્છ્રોત્રમસ્ય જાયતે ભાવિતાત્મનઃ ।
રૂપરાગાત્ તથા ચક્ષુર્ઘ્રાણં ગન્ધજિઘૃક્ષયા ॥

ઇત્યાદિના મોક્ષધર્માદાવિન્દ્રિયાદીનાં મનોવૃત્તિરાગાદિકાર્યત્વશ્રવણાત્ ।
તતશ્ચાહઙ્કારાત્ સઙ્કલ્પપૂર્વકં દશેન્દ્રિયાણિ પઞ્ચતન્માત્રાનિ
ચોત્પદ્યન્તે । ઇન્દ્રિયતન્માત્રયોશ્ચ કાર્યકારણભાવસ્યાભાવાત્ ક્રમનિયમો
નાસ્તિ । તત્રેન્દ્રિયેષુ નાસ્ત્યવાન્તરકાર્યકારણભાવઃ પ્રમાણાભાવાત્ ।

તન્માત્રેષુ ત્વસ્તિ । સ યથા । શબ્દતન્માત્રાદ્વક્ષ્યમાણક્રમેણ સ્પર્શતન્માત્રં શબ્દસ્પર્શોભયગુણકમેવં ક્રમેણૈકૈકગુણવૃદ્ધ્યા પરતન્માત્રત્રયં પૂર્વપૂર્વતન્માત્રેભ્ય ઉત્પદ્યતે પાતઞ્જલભાષ્યે તન્માત્રેષુ ક્રમેણૈકૈકગુણવૃદ્ધિવચનાત્ । તતશ્ચ પઞ્ચતન્માત્રેભ્યઃ પઞ્ચભૂતાનિ જાયન્તે । તત્રાહઙ્કારાત્ પઞ્ચતન્માત્રાણાં તદ્દ્વારા ભૂતાનાં ચોત્પત્તૌ ક્રમઃ કૂર્મવિષ્ણ્વાદિપુરાણેષૂક્તઃ । યથા કૂર્મે ।

ભૂતાદિસ્તુ વિકુર્વાણઃ શબ્દમાત્રં સસર્જ હ ।
આકાશં સુષિરં તસ્માદુત્પન્નં શબ્દલક્ષણમ્ ॥

આકાશસ્તુ વિકુર્વાણઃ સ્પર્શમાત્રં સસર્જ હ ।
વાયુરુત્પદ્યતે તસ્માત્ તસ્ય સ્પર્શો ગુણો મતઃ ॥

ઇત્યાદિક્રમેણેતિ । નન્વેવમાકાશાદિભૂતચતુષ્ટયસ્યાપિ તત્ત્વાન્તરારમ્ભકત્વેન પ્રકૃતિત્વાપત્ત્યા કેવલવિકૃતિત્વસિદ્ધાન્તક્ષતિરિતિ ચેન્ન । આકાશાદીનાં સ્પર્શાદિતન્માત્રેષ્વહઙ્કારોપષ્ટમ્ભમાત્રેણ કારણત્વસ્ય પુરાણેષૂક્તત્વાદિતિ । તદેવં ત્રયોવિંશતિતત્ત્વાનામુત્પત્તિરુક્તા । તત્ર પઞ્ચભૂતાનિ વર્જયિત્વાઽહઙ્કારં ચ બુદ્ધૌ પ્રવેશ્ય સપ્તદશકં લિઙ્ગશરીરસઞ્જ્ઞં ભવતિ વહ્નેરિન્ધનવદાત્મનોઽભિવ્યક્તિસ્થાનત્વાત્ । તચ્ચ સર્વપુરુષાણાં સર્ગાદાવુત્પદ્ય પ્રાકૃતપ્રલયપર્યન્તં તિષ્ઠતિ । તેનૈવ ચેહલોકપરલોકયોઃ સંસરણં જીવાનાં ભવતિ । પ્રાણશ્ચ બુદ્ધેરેવ વૃત્તિભેદ ઇત્યતો ન લિઙ્ગશરીરાત્ પૃથઙ્ નિર્દિશ્યતે । તસ્ય લિઙ્ગશરીરસ્ય સૂક્ષ્માણિ પઞ્ચભૂતાન્યાશ્રયશ્ચિત્રાદિવદાશ્રયં વિના પરમસૂક્ષ્મસ્ય લોકાન્તરગમનાસમ્ભવાત્ । ઇદં ચ લિઙ્ગશરીરમાદૌ સ્વયમ્ભુવ ઉપાધિભૂતમેકમેવ જાયતે । તસ્યૈવ વિરાડાખ્યવક્ષ્યમાણસ્થૂલશરીરવત્ । તતશ્ચ વ્યષ્ટિજીવાનામુપાધિભૂતાનિ વ્યષ્ટિલિઙ્ગશરીરાણિ તદંશભૂતાનિ તતો વિભજ્યન્તે । પિતુર્લિઙ્ગશરીરાત્ પુત્રલિઙ્ગશરીરવત્ । તદુક્તં સૂત્રકારેણ । વ્યક્તિભેદઃ કર્મવિશેષાદિતિ । મનુનાઽપ્યુક્તમ્ ।

તેષાં ત્વવયવાન્ સૂક્ષ્માન્ ષણ્ણામપ્યમિતૌજસામ્ ।
સન્નિવેશ્યાત્મમાત્રાસુ સર્વભૂતાનિ નિર્મમે ॥

ઇતિ । ષણ્ણામિતિ ષડિન્દ્રિયં સમસ્તલિઙ્ગશરીરોપલક્ષકમ્ । તથા ચ સ્વયમ્ભૂઃ સ્વલિઙ્ગશરીરાવયવાન્ સૂક્ષ્માન્ અલ્પાન્

આત્મમાત્રાસુ સ્વાંશચેતનેષુ સંયોજ્ય સર્વપ્રાણિનઃ સસર્જેત્યર્થઃ ।
લિઙ્ગશરીરં નિરુપિતમ્ । સ્થૂલશરીરોત્પત્તિરુચ્યતે ।
દશગુણિતમહત્તત્ત્વમધ્યેઽહઙ્કારોઽહઙ્કારસ્યાપિ દશગુણિતસ્ય મધ્યે
વ્યોમ વ્યોમ્નોઽપિ દશગુણિતસ્ય મધ્યે વાયુર્વાયોરપિ દશગુણિતસ્ય મધ્યે
તેજઃ તેજસોઽપિ દશગુણિતસ્ય મધ્યે જલં જલસ્યાપિ દશગુણિતસ્ય
મધ્યે પૃથિવી સમુત્પદ્યતે । સૈવ સ્થૂલશરીરસ્ય બીજમ્ । તદેવ ચ
પૃથિવીરૂપં બીજમણ્ડરૂપેણ પરિણમતે । તસ્યાપિ દશગુણિતસ્યાણ્ડરૂપસ્ય
પૃથિવ્યાવરણસ્ય મધ્યે ચતુર્દશભુવનાત્મકં સ્વયમ્ભુવં સ્થૂલશરીરં
તત્સઙ્કલ્પાદેવોત્પદ્યતે । તેનૈવ શરીરેણ સ્વયમ્ભૂર્નારાયણ ઇત્યુચ્યતે ।
તદુક્તં મનુના સ્વયમ્ભુવં પ્રકૃત્ય ।
સોઽભિધ્યાય શરીરાત્ સ્વાત્ સિસૃક્ષુર્વિવિધાઃ પ્રજાઃ ।
અપ એવ સસર્જાદૌ તાસુ બીજમવાસૃજત્ ॥

તદણ્ડમભવદ્ધૈમં સહસ્રાંશુસમપ્રભમ્ ।
તસ્મિન્ જજ્ઞે સ્વયં બ્રહ્મા સર્વલોકપિતામહઃ ॥

સ વૈ શરીરી પ્રથમઃ સ વૈ પુરુષ ઉચ્યતે ।
આદિકર્તા સ ભૂતાનાં બ્રહ્માગ્રે સમવર્તત ॥

આપે નારા ઇતિ પ્રોક્તા આપો વૈ નરસૂનવઃ ।
તા યદસ્યાયનં પૂર્વં તેન નારાયણઃ સ્મૃતઃ ॥

ઇત્યાદિનેતિ । તત એવ ચાદિપુરુષાત્ વ્યષ્ટિપુરુષાણાં વિભાગાદન્તે ચ
તત્રૈવ લયાત્ સ એવ ચૈક આત્મેતિ શ્રુતિસ્મૃત્યોર્વ્યવહ્રિયતે । અતો ન
વ્યવહારપરતયા નારાયણ એવ સર્વભૂતાનામાત્મેતિ શ્રુતિસ્મૃતિવિરોધ ઇતિ ।
તતશ્ચ સ નારાયણો વિરાટ્ શરીરી સ્વનાભિકમલકર્ણિકાસ્થાનીયસ્ય
સુમેરોરુપરિ ચતુર્મુખાખ્યસ્વયમ્ભુવં સૃષ્ટ્વા તદ્દ્વારાઽન્યાનપિ
વ્યષ્ટિશરીરિણઃ સ્થાવરાન્તાન્ સસર્જ । તથા ચ સ્મર્યતે ।
તચ્છરીરસમુત્પન્નૈઃ કાર્યૈસ્તૈઃ કરણૈઃ સહ ।
ક્ષેત્રજ્ઞાઃ સમજાયન્ત ગાત્રેભ્યસ્તસ્ય ધીમતઃ ॥

ઇતિ । યત્તુ શેષશાયિનો નારાયણસ્ય
નાભિકમલશ્રોત્રચક્ષુરાદિભ્યશ્ચતુર્મુખસ્યાવિર્ભાવઃ
શ્રૂયતે તદ્દૈનન્દિનસર્ગેષ્વેવ કલ્પભેદેન મન્તવ્યમ્ ।
દૈનન્દિનપ્રલયેષ્વેવ હિ નારાયણશરીરે પ્રવિશ્યૈકીભૂય સુપ્તાનાં

દેવાનાં ચતુર્મુખાદિક્રમેણાવિર્ભાવઃ શેષશાયિનઃ સકાશાદ્ઘટતે ન ત્વાદિસર્ગેષુ । દૈનન્દિનપ્રલય એવ લીલાવિગ્રહેણ શયનાદિતિ । તદેવં સઙ્ક્ષેપતશ્ચતુર્વિંશતિતત્ત્વાનિ તેષાં સૃષ્ટિરૂપં પ્રયોજનં ચોક્તમ્ । તત્ર યદ્યસ્માજ્જાયતે તસ્ય તદાપૂરણેનૈવ સ્થિતિઃ તતસ્તસ્ય સંહારોઽપિ તત્રૈવ ભવતિ ।

યદ્યસ્માજ્જાયતે તત્ત્વં તત્તત્ર પ્રવિલીયતે ।
લીયન્તે પ્રતિલોમાનિ જાયન્તે ચોત્તરોત્તરમ્ ॥

ઇતિ ભારતાદિભ્ય ઇતિ । એતે ચ સૃષ્ટિસ્થિતિસંહારરૂપાઃ સ્થૂલા એવ પરિણામાશ્ચતુર્વિંશતિતત્ત્વાનાં કૂટસ્થપુરુષવિવેકાય પ્રદર્શિતાઃ । સૂક્ષ્મા અપ્યન્યે પ્રતિક્ષણપરિણામા એતેષાં સ્મર્યન્તે । તથા ।

નિત્યદા હ્યઙ્ગભૂતાનિ ભવન્તિ ન ભવન્તિ ચ ।
કાલેનાલક્ષ્યવેગેન સૂક્ષ્મત્વાત્તન્ન દૃશ્યતે ॥

ઇતિ । અતશ્ચ સર્વં જડવસ્તુ પરમાર્થતઃ સર્વદૈવાસદુચ્યતે । તતશ્ચ તસ્માદ્વિરજ્યાત્મૈવ પરમાર્થસત્યો દુઃખભીરુભિર્દ્રષ્ટવ્યઃ । તદુક્તમનુગીતાયામ્ ।

અવ્યક્તબીજપ્રભવો બુધિસ્કન્ધમયો મહાન્ ।
મહાહઙ્કારવિટપ ઇન્દ્રિયાઙ્કુરકોટરઃ ॥

મહાભૂતપ્રશાખશ્ચ વિશેષપ્રતિશાખવાન્ ।
સદાપર્ણઃ સદાપુષ્પઃ શુભાશુભફલોદયઃ ॥

આજીવઃ સર્વભૂતાનાં બ્રહ્મવૃત્તઃ સનાતનઃ ।
એતજ્જ્ઞાત્વા ચ તત્ત્વેન જ્ઞાનેન પરમાસિના ॥

છિત્ત્વા ચાક્ષરતાં પ્રાપ્ય જહાતિ મૃત્યુજન્મની ।

ઇતિ શ્રીવિજ્ઞાનભિક્ષુવિરચિતે સાઙ્ખ્યસારે વિવેકપ્રતિયોગિનાં પ્રકૃત્યાદીનાં સ્વરૂપપરિચ્છેદઃ ॥ * ॥

ઇતિ સાઙ્ખ્યસારસ્ય પૂર્વભાગઃ ॥

————————

અથોત્તરભાગઃ ॥

પ્રથમઃ પરિચ્છેદઃ ॥

અથ શિષ્યૈઃ સુખેનૈવ ગ્રહીતું પદ્યમાલયા ।
વિવેકસ્યાનુયોગ્યાત્મા પુરુષાખ્યો નિરૂપ્યતે ॥ ૧॥

તત્ર સામાન્યતઃ સિદ્ધો જાનેઽહમિતિ ધીબલાત્ ।
દ્રષ્ટાઽતો નિત્યવિભ્વાદિધર્મૈરેવ સ સાધ્યતે ॥ ૨॥

ભોક્તા નિત્યસ્તદર્થત્વાત્ તત્કર્મોત્પાદિતત્વતઃ ।
મહદાદિવિકારાણાં સર્વેષામવિશેષતઃ ॥ ૩॥

અપિ ચાદૃષ્ટસંસ્કારાધારત્વાદ્બીજરૂપતઃ ।
ધીરનાદિરતોઽસ્યાશ્ચ સિદ્ધા ભોક્તુરનાદિતા ॥ ૪॥

સ્વસ્વામિભાવાનાદિત્વમૃતે ભોક્તૃવ્યવસ્થિતેઃ ।
સ્વભક્તવૃત્તિસંસ્કારવત્ત્વં સ્વત્વં તુ બુદ્ધિષુ ॥ ૫॥

સ્વામ્યં સ્વનિષ્ઠસંસ્કારહેતુવૃત્તેશ્ચ ભોક્તરિ ।
અતશ્ચ ઘટતે સ્વત્વનાશે કૈવલ્યમાત્મનઃ ॥ ૬॥

ભોક્તુશ્ચાનાદિભાવસ્ય વિનાશે હેત્વસમ્ભવાત્ ।
ન નાશો ભોક્તુરસ્તીતિ ભોક્તા નિત્યો હિ સિધ્યતિ ॥ ૭॥

જન્યો જ્ઞાનપ્રકાશોઽસ્ય નિત્યત્વે તુ ન યુજ્યતે ।
ન હ્યપ્રકાશે કુત્રાપિ પ્રકાશોત્પત્તિરીક્ષ્યતે ॥ ૮॥

કાર્યે પ્રકાશાખ્યગુણેઽવયવાનાં હિ તદ્ગુણઃ ।
કારણં તેન નાનિત્યઃ પ્રકાશો નિત્યવસ્તુનિ ॥ ૯॥

પ્રકાશાશ્રયસંયોગાત્ પ્રકાશભ્રમ ઇન્ધને ।
આદર્શે ચાવૃતેર્ભઙ્ગાત્ પ્રકાશોત્પત્તિવિભ્રમઃ ॥ ૧૦॥

તસ્માન્નિત્યાત્મનો જ્ઞાનં નિત્યં વાચ્યં તથા સતિ ।
લાઘવાજ્જ્ઞાનમેવાત્મા નિરાધારઃ પ્રકલ્પ્યતે ॥ ૧૧॥

અનાશ્રિતતયા દ્રવ્યં સંયોગાદેશ્ચ તન્મતમ્ ।
અતો જ્ઞાનેઽહમિત્યાદિબુદ્ધિરપ્યુપપદ્યતે ॥ ૧૨॥

પિણ્ડેઽહન્ધીર્હિ મૂઢાનાં ધ્રુવૈવાનાદિદોષતઃ ।
સંયોગાત્તત્ર પિણ્ડે તુ જ્ઞાનવત્ત્વમતિઃ પ્રમા ॥ ૧૩॥

સન્તુ વાઽઽધેયતાઽલ્પત્વજન્મનાશાદિબુદ્ધયઃ ।
શ્રોત્રસ્ય નભસીવાર્થજ્ઞાનસ્ય જ્ઞાનમાત્રકે ॥ ૧૪॥

તસ્માલ્લાઘવતર્કેણ બાધકાભાવતસ્તથા ।
શ્રુત્યાદિભિશ્ચ નિત્યાત્મા ચિદ્રૂપેણૈવ સિધ્યતિ ॥ ૧૫॥

તજ્જ્ઞાનં વિભુ નિત્યત્વાદ્દેહવ્યાપિતયાઽપિ ચ ।
મધ્યત્વે નાશિતા હિ સ્યાદણુત્વે વાઽલ્પદેશતા ॥ ૧૬॥

વિભુત્વેઽપિ સ્વધીવૃત્તેરેવ સાક્ષાન્નિરીક્ષણાત્ ।
ન સર્વત્ર સદા સર્વભાનં જ્ઞાને પ્રસજ્યતે ॥ ૧૭॥

અર્થભાનં ચિતાવર્થપ્રતિબિમ્બો મતો બુધૈઃ ।
વૃત્તેરેવ ચિત્તૌ સાક્ષાત્પ્રતિબિમ્બનયોગ્યતા ॥ ૧૮॥

અતોઽસઙ્ગેઽપિ કૂટસ્થચૈતન્યે વિભુનિ ધ્રુવે ।
વૃત્તિદ્વારકમેવાન્યભાનં ફલબલાન્ મતમ્ ॥ ૧૯॥

અન્વયવ્યતિરેકાભ્યાં વૃત્તિજન્યતયાઽખિલઃ ।
વૃત્ત્યૈકાધિકરણ્યેન કામાદિર્ધીષુ નાત્મસુ ॥ ૨૦॥

અતોઽન્તઃસ્વવિકારાણાં સ્વસ્વબુદ્ધિષ્વવસ્થિતેઃ ।
કૂટાસ્થ એવ સર્વોઽપિ ચિદાકાશગણઃ સમઃ ॥ ૨૧॥

નિત્યશુદ્ધો નિત્યબુદ્ધો નિત્યમુક્તો નિરઞ્જનઃ ।
સ્વપ્રકાશો નિરાધારઃ પ્રદીપઃ સર્વવસ્તુષુ ॥ ૨૨॥

નન્વેવમેકતૈવાસ્તુ લાઘવાદાત્મનાં સ્વવત્ ।
ધીષ્વેવ સુખદુઃખાદિવૈધર્મ્યાદિતિ ચેન્ન તત્ ॥ ૨૩॥

ભોગાભોગાદિવૈધર્મ્યેણૈકરૂપેઽપિ ચિદ્ગણે ।
શ્રુતિસ્મૃતિભ્યામુક્તેન ભેદસિદ્ધેઃ પરસ્પરમ્ ॥ ૨૪॥

સુખાદિપ્રતિબિમ્ભાત્મા ભોગોઽપ્યસ્ય ન વસ્તુતઃ ।
તથાઽપ્યસ્ય ચિતૌ ભાવાભાવૌ સ્યાતાં હિ ભેદકૌ ॥ ૨૫॥

ઔપાધિકૌ યથા શ્યામરાગૌ સ્ફટિકભેદકૌ ।
સ્વદૃષ્ટાન્તશ્ચ વિષમો વૈધર્મ્યાસિદ્ધિતોઽમ્બરે ॥ ૨૬॥

ઇતિ શ્રીવિજ્ઞાનભિક્ષુવિરચિતે સાઙ્ખ્યસારે પુરુષસ્વરૂપપરિચ્છેદઃ ॥ *॥

————————-

અથ દ્વિતીયઃ પરિચ્છેદઃ ॥

અથાત્માનાત્મવૈધર્મ્યે ગુણદોષાત્મકે તયોઃ ।
વક્ષ્યે વિસ્તારતો યેન વિવેકોઽતિસ્ફુટો ભવેત્ ॥ ૧॥

સામાન્યાત્મઘનાકાશે સાન્નિધ્યેરિતશક્તિભિઃ ।
જાયતે લીયતે ભૂત્વા ભૂયોઽયં જગદમ્બુદઃ ॥ ૨॥

ત્રિગુણાત્મકશક્તીનાં પરિણામૈરતશ્ચિતિઃ ।
આધારવિધયા વિશ્વોપાદાનમવિકારતઃ ॥ ૩॥

યથાઽઽધરતયા તોયં ધરોપાદાનમિષ્યતે ।
સ્વસ્થપાર્થિવતન્માત્રદ્વારેણૈવં ચિતિર્મતા ॥ ૪॥

અતો જગદુપાદાનમપિ બ્રહ્માવિકારતઃ ।
કૂટસ્થનિત્યપર્યાયપરમાર્થસદુચ્યતે ॥ ૫॥

સ્વાર્થત્વાત્ સ્વાનુભૂત્યા ચ સિદ્ધત્વાત્ પરમાર્થસત્ ।
સ્વતઃ સ્થિત્યા સ્વતઃ સિદ્ધ્યા લોકૈઃ સન્નિતિ હીર્યતે ॥ ૬॥

પ્રતિક્ષણવિકારેણ તૈસ્તૈ રૂપૈરપાયતઃ ।
પ્રકૃત્યાદિરસત્ સર્વો જડાર્થોઽબ્ધૌ તરઙ્ગવત્ ॥ ૭॥

યત્તુ કાલાન્તરેણાપિ નાન્યસઞ્જ્ઞામુપૈતિ વૈ ।
પરિણામાદિસમ્ભૂતાં તદ્વસ્ત્વિત્યાદિકસ્મૃતેઃ ॥ ૮॥

પરાર્થાધીનસત્ત્વાચ્ચ પરદૃષ્ટ્યા ચ સિદ્ધિતઃ ।
પરતઃ સન્નસન્નેવ તત્પરાપેક્ષયા મતઃ ॥ ૯॥

સતોઽસ્તિત્વં તુ નાસત્તા નાસ્તિત્વે સત્યતા કુતઃ ।
ઇતિ ગારુડતશ્ચૈવં સદસત્ત્વવ્યવસ્થિતેઃ ॥ ૧૦॥

અતો ન સન્નાસદિદં જગત્ સદસદાત્મકમ્ ।
અસદ્વિષયકત્વાચ્ચ તસ્ય ધીસ્તાત્ત્વિકો ભ્રમઃ ॥ ૧૧॥

જગદ્વૃક્ષસ્ય ચૈતન્યં સારોઽસારસ્તથેતરત્ ।
પ્રપઞ્ચસ્ય સ્થિરાંશો હિ ચિતિરેવાવિકારતઃ ॥ ૧૨॥

તદન્યદખિલં તુચ્છમસારત્વાદુદીર્યતે ।
તથાઽનૃતમસચ્ચાપિ તદપેક્ષાસ્થિરત્વતઃ ॥ ૧૩॥

એવંવિધૈવાત્મસત્તા અન્યાસત્તા ચ દર્શિતા ।

વાસિષ્ઠાદૌ વિસ્તરતો યથા લેશાત્તદુચ્યતે ॥ ૧૪॥

સ્વપ્નો જાગ્રત્યસદ્રૂપઃ સ્વપ્ને જાગ્રદસદ્વપુઃ ।
મૃતિર્જન્મન્યસદ્રૂપા મૃતૌ જન્માપ્યસન્મયમ્ ॥ ૧૫॥

જગન્મયી ભ્રાન્તિરિતિ ન કદાપિ ન વિદ્યતે ।
વિદ્યતે ન કદાચિચ્ચ જલબુદ્બુદવત્ સ્થિતમ્ ॥ ૧૬॥

આત્મૈવાસ્તિ પરં સત્યં નાન્યાઃ સંસારદૃષ્ટયઃ ।
શુક્તિકારજતં યદ્વદ્યથા મરુમરીચિકા ॥ ૧૭॥

અસ્તિ સર્વગતં શાન્તં પરમાત્મઘનં શુચિ ।
અચિન્ત્યચિન્માત્રવપુઃ પરમાકાશમાતતમ્ ॥ ૧૮॥

તત્સર્વગં સર્વશક્તિ સર્વં સર્વાત્મકં સ્વયમ્ ।
યત્ર યત્ર યથોદેતિ યથાઽઽસ્તે તત્ર તત્ર વૈ ॥ ૧૯॥

આવિર્ભાવતિરોભાવમયાસ્ત્રિભુવનોર્મયઃ ।
સ્ફુરન્ત્યતિતતે યસ્મિન્ મરાવિવ મરીચયઃ ॥ ૨૦॥

અસતેવ સતી તોયનદ્યેવ લહરી ચલા ।
મનસેવેન્દ્રજાલશ્રીર્જાગતી પ્રવિતન્યતે ॥ ૨૧॥

બ્રહ્મણા તન્યતે વિશ્વં મનસૈવ સ્વયમ્ભુવા ।
મનોમયમતો વિશ્વં યન્નામ પરિદૃશ્યતે ॥ ૨૨॥

યો હ્યશુદ્ધમતિર્મૂઢો રૂઢો ન વિતતે પદે ।
વજ્રસારમિદં તસ્ય જગદસ્ત્યસદેવ સત્ ॥ ૨૩॥

અવ્યુત્પન્નસ્ય કનકે કાનકે કટકે યથા ।
કટકજ્ઞપ્તિરેવાસ્તિ ન મનાગપિ હેમધીઃ ॥ ૨૪॥

તથાઽજ્ઞસ્ય પુરાગારનગનાગેન્દ્રભાસુરા ।
ઇયં દૃશ્યદૃગેવાસ્તિ ન ત્વન્યા પરમાર્થદૃક્ ॥ ૨૫॥

ઇત્યાદિવાક્યૈર્વાસિષ્ઠે નાત્યન્તાસત્યતોદિતા ।
જગતોઽપરવાક્યૈર્હિ સત્કાર્યં પ્રાકૃતં મતમ્ ॥ ૨૬॥

નામરૂપવિનિર્મુક્તં યસ્મિન્ સન્તિષ્ઠતે જગત્ ।
તમાહું પ્રકૃતિં કેચિન્ માયામેકેઽપરે ત્વણૂન્ ॥ ૨૭॥

સુષુપ્તાવસ્થયા ચક્રપદ્મરેખાશિલોદરે ।
યથા સ્થિતા ચિતેરન્તસ્તથેયં જગદાવલી ॥ ૨૮॥

પ્રકૃતિવ્રતતિર્વ્યોમ્નિ જાતા બ્રહ્માણ્ડસત્ફલા ।
ઇત્યાદિવાક્યૈઃ સાઙ્ખ્યીયસત્કાર્યાદ્યુપવર્ણનાત્ ॥ ૨૯॥

ઇતિ શ્રીવિજ્ઞાનભિક્ષુવિરચિતે સાઙ્ખ્યસારે આત્માનાત્મનોઃ
સત્યત્વાસત્યત્વવૈધર્મ્યપરિચ્છેદઃ ॥ *॥

————————-

અથ તૃતીયઃ પરિચ્છેદઃ ॥

તદેવાત્મનઃ સત્તા દર્શિતાઽન્યવિલક્ષણા ।
અથ ચિદ્રૂપતાં વક્ષ્યે બુદ્ધિવૃત્તિવિલક્ષણામ્ ॥ ૧॥

અનુભૂતિશ્ચિતિર્બોધો વેદનં ચોચ્યતે પુમાન્ ।
વેદ્યં જડં તમોઽજ્ઞાનં પ્રધાનાદિકમુચ્યતે ॥ ૨॥

વેદનં વેદ્યસમ્બન્ધાદેવ વેત્ત્રભિધીયતે ।
યથા પ્રકાશ્યસમ્બન્ધાત્ પ્રકાશોઽપિ પ્રકાશકઃ ॥ ૩॥

યથા વાઽર્થોપરાગેણ ભાનમર્થસ્ય ભાસકમ્ ।
એવં વેદ્યોપરક્તસ્યાસ્વાંશસ્યાધારતાંઽશિનિ ॥ ૪॥

અસઙ્ગાયાં ચિતૌ વેદ્યોપરાગોઽયં ન ધીષ્વિવ ।
કિન્તુ સાક્ષાદ્દ્વારતો વા ચિતિ તત્પ્રતિબિમ્બનમ્ ॥ ૫॥

બાહ્યં વૃત્ત્યાખ્યકરણાભાવાદનુપરાગતઃ ।
ચિતિર્નૈવેક્ષતે ચેત્યં વિભુત્વેઽપિ ચ સર્વતઃ ॥ ૬॥

તથા ચિદપિ વૃત્ત્યાખ્યકરણાભાવતોઽર્થવત્ ।
સ્વગોચરાં વૃત્તિમૃતે તિષ્ઠત્યજ્ઞાતસત્તયા ॥ ૭॥

તદેવં ચિન્નિરાકારા પ્રકાશાકાશરૂપિણી ।
તિષ્ઠત્યવ્યક્તરૂપા ચ મોક્ષાદૌ વૃત્ત્યભાવતઃ ॥ ૮॥

બુદ્ધિવૃત્તિસ્તુ સાકારા પરિચ્છિન્ના ચ દીપવત્ ।
વ્યક્તા ચ સર્વદા તદ્વદસઙ્ખ્યા ક્ષણભઙ્ગુરા ॥ ૯॥

જડા ચ પરદૃશ્યત્વાદ્ઘટદીપાદિવન્ મતા ।

વૃત્તેઃ પ્રકાશતા ત્વર્થાકારત્વાદક્ષતૈવ હિ ॥ ૧૦॥

યથાઽસ્યાકારતાર્હત્વાદાદર્શસ્તત્પ્રકાશકઃ ।
સર્વાકારત્વયોગ્યત્વાત્ સૈવં સર્વપ્રકાશિકા ॥ ૧૧॥

ન પુનર્વૃત્તિદ્રષ્ટૃત્વં ચિતસ્તદ્ભિન્નદ્રષ્ટૃતા ।
વૃત્તેર્યતો ગૌરવં સ્યાદ્દ્વયોર્જ્ઞાતૃત્વકલ્પને ॥ ૧૨॥

બુદ્ધ્યારૂઢં ત્વન્યવસ્તુ તદ્દ્વારા પ્રતિબિમ્બિતમ્ ।
પશ્યત્યનુભવો નાન્યો દ્રષ્ટા બુદ્ધ્યાદિકોઽખિલઃ ॥ ૧૩॥

ઇત્યેવં બુદ્ધિવૃત્તિભ્યો વૈલક્ષણ્યં ચિતીરિતમ્ ।
ચિદચિત્ત્વાખ્યવૈધર્મ્યં દેહાદિભ્યઃ સ્ફુટન્ત્વિદમ્ ॥ ૧૪॥

અન્યોન્યપ્રતિબિમ્બેન સારૂપ્યાદ્વૃતિબોધયોઃ ।
બોધવ્યવહૃતિર્વૃત્તૌ લોહેઽગ્નિવ્યવહારવત્ ॥ ૧૫॥

નૈવાલ્પબુદ્ધ્યાશક્યોઽયં વિવેકો વૃત્તિબોધયોઃ ।
તાર્કિકા યત્ર સમ્મૂઢાઃ સાઙ્ખ્યાનાં શ્રેષ્ઠતા યતઃ ॥ ૧૬॥

વિજ્ઞાનવાદિનો બૌદ્ધા વૃત્તિબોધાવિવેકતઃ ।
જ્ઞાતાત્મત્વશ્રુતૌ મૂઢા મેનિરે ક્ષણિકાં ચિતિમ્ ॥ ૧૭॥

સત્ત્વપુંસો વિવેકોઽયં વૃત્તિતદ્બોધરૂપયોઃ ।
નાશક્યઃ સુધિયાં યદ્વદ્ધંસાનાં ક્ષીરનીરયોઃ ॥ ૧૮॥

એતદન્તશ્ચ સંસારો મોક્ષાસ્તત્રૈવ સંસ્થિતઃ ।
યદ્વૃત્તિભ્યો વિવેકેન તદ્બોધસ્યાવધારણમ્ ॥ ૧૯॥

સર્વોઽપ્યનુભવં વેદ ન કશ્ચિદપિ વેદતામ્ ।
વિવેકમાત્રમસ્મિન્ હિ ભાસમાનેઽપ્યપેક્ષતે ॥ ૨૦॥

આત્મા વિવેક્તું બાહ્યાર્થે ન શક્યો વૃતિમિશ્રણાત્ ।
અતો વૃત્તૌ વિવેક્તવ્યો વૃત્તિબોધતયૈવ સઃ ॥ ૨૧॥

યથા બુદ્ધ્યા વિવેકાર્હો નાગ્નિરઙ્ગારમિશ્રણાત્ ।
સોઽઙ્ગારે તુ વિવેકાર્હો કાષ્ઠદગ્ધૃતયા સ્ફુટમ્ ॥ ૨૨॥

અતએવ શ્રુતૌ સ્વપ્ને દૃશ્યવૃત્તિવિવેકતઃ ।
સ્વયંજ્યોતિઃસ્વરૂપેણ તસ્યા દ્રષ્ટા પ્રદર્શિતઃ ॥ ૨૩॥

સાક્ષાત્ પ્રકાશો યો યસ્ય સ તદ્ભિન્નો મતો બુધૈઃ ।
ઘટાદિભ્યો યથાઽઽલોક આલોકાચ્ચાપિ વૃત્તયઃ ॥ ૨૪॥

વૃત્તેઃ સાક્ષાત્ પ્રકાશત્વાદતોઽનુભવરૂપકઃ ।
વૃત્તિભ્યો ભિન્ન આત્મેતિ શીઘ્રો માર્ગઃ સ્વદર્શને ॥ ૨૫॥

એવમાદિપ્રકારેણ બુદ્ધિસત્ત્વપ્રકાશતઃ ।
વિલક્ષણતયા સિદ્ધશ્ચિત્પ્રકાશોઽસ્ય ભાસકઃ ॥ ૨૬॥

સ્વપ્નદેહાદિદૃષ્ટાન્તૈસ્તસ્માચ્છ્રુત્યાદિદર્શિતૈઃ ।
જાગ્રદ્દેહેન્દ્રિયાર્થેભ્યશ્ચિતિર્ભિન્નતયા મતા ॥ ૨૭॥

સ્વપ્ને દેહાદિકં સર્વં ચિદ્ભિન્નં ચિતિ ભાસતે ।
જાગ્રત્યેવં વિશેષસ્તુ યદ્બાહ્યમપિ ભાસતે ॥ ૨૮॥

સ્વપ્ને મનોમયત્વાચ્ચ સાક્ષાચ્ચિદ્વિષયોઽખિલમ્ ।
કરણદ્વારતો બાહ્યં ચિતો જાગ્રતિ ગોચરઃ ॥ ૨૯॥

સર્વં દેહાદિકં સ્વપ્નજાગ્રતોરેકરૂપતઃ ।
ભાતિ ચિદ્વ્યોમ્નિ નાત્રાર્થબાહ્યાન્તર્ભેદતો ભિદા ॥ ૩૦॥

ચિદ્વ્યોમ્નિ વાસનાતો ધીઃ પ્રમાણાદ્વાઽર્થરૂપિણી ।
તતશ્ચિતોઽર્થભાનં યત્ તત્ સમં સ્વપ્નજાગ્રતોઃ ॥ ૩૧॥

તદિદં સ્વાનુભૂત્યૈવ પ્રોચ્યતે ન પરોક્ષતઃ ।
સ્વપ્નદૃષ્ટાન્તસદૃશો નોપાયોઽસ્ત્યાત્મદર્શને ॥ ૩૨॥

સુષુપ્તૌ હિ યથા સ્વપ્ને સ્વાત્મન્યેવેક્ષતેઽખિલમ્ ।
આત્માનં ચૈકદેશસ્થં મન્યતે જાગરે તથા ॥ ૩૩॥

સુષુપ્તિરાત્મનસ્તત્ત્વં સ્વરૂપાવસ્થિતેસ્તદા ।
જાગ્રત્સ્વપ્નૌ માયિકૌ તુ મૃષાસારૂપ્યતો ધિયા ॥ ૩૪॥

બુદ્ધેઃ સુષુપ્તિસ્તમસાઽઽવરણં તદ્વિલક્ષણા ।
ચિતેઃ સુષુપ્તિર્વૃત્ત્યાખ્યદૃશ્યાવરણશૂન્યતા ॥ ૩૫॥

પૂર્ણઃ કૂટસ્થનિત્યશ્ચ સ્વસ્વધીમાત્રવૃત્તિદૃક્ ।
વૃત્ત્યાખ્યદૃશ્યવિરહાત્ સર્વદા નેક્ષતે પુમાન્ ॥ ૩૬॥

વૃત્તિદેશે યથા બોધસ્તથા સર્વત્ર સર્વદા ।
વૃથૈવ તપ્યતે મૂઢૈર્વ્યયનાશાદિનાઽઽત્મનઃ ॥ ૩૭॥

દુઃખભોગમહારોગનિદાનં દેહગેહિની ।
બુદ્ધિર્ન ત્યજ્યતે મૂઢૈર્મહાનિદ્રાસુખં યતઃ ॥ ૩૮॥

અનાદિબુદ્ધિગાર્હસ્થ્યં વિવેકસ્ત્યજ્યતે ન ચેત્ ।
ન મોક્ષો બાહ્યસન્ન્યાસાદિહામુત્રાસુખં પરમ્ ॥ ૩૯॥

સમચિન્માત્રરૂપેષુ સ્વપરાત્મસુ સર્વદા ।
બુદ્ધિમાત્રવિવેકેન સ્વપરાદિભિદા મૃષા ॥ ૪૦॥

ચિન્માત્રે નિર્ગુણે સ્વામિન્યારોપ્યૈવાત્મકર્તૃતામ્ ।
સ્વામ્યવજ્ઞાપરાધેન વધ્યતે ધીઃ સ્વકર્મભિઃ ॥ ૪૧॥

સાધ્વી તુ ધીઃ પતિં દૃષ્ટ્વા યાથાતથ્યેન તત્પરા ।
ઇહાનન્દમયી ચાન્તે પતિદેહે લયં વ્રજેત્ ॥ ૪૨॥

નાહં કર્તા સુખી દુઃખી ચિન્માત્રાકાશરૂપકઃ ।
એવં નાથં ચિન્તયન્તી ન પત્યુર્દુઃખભોગદા ॥ ૪૩॥

ઇતિ શ્રીવિજ્ઞાનભિક્ષુવિરચિતે સાઙ્ખ્યસારે
આત્માનાત્મનોશ્ચિદચિત્ત્વવૈધર્મ્યપરિચ્છેદઃ ॥ *॥

———————-

અથ ચતુર્થઃ પરિચ્છેદઃ ॥

ઇત્યેવમાત્મનઃ પ્રોક્તો બુદ્ધ્યાદિભ્યો વિલક્ષણઃ ।
ચિત્પ્રકાશોઽધુનાઽઽનન્દરૂપતા વક્ષ્યતે તથા ॥ ૧॥

દુઃખં કામસુખાપેક્ષા સુખં દુઃખસુખાત્યયઃ ।
ઇતિ સ્મૃતેઃ સુખાત્મત્વં નિત્યનિર્દુઃખતાઽઽત્મનઃ ॥ ૨॥

પરિભાષાબલાદ્રૂઢિબાધઃ સર્વત્ર સમ્મતઃ ।
અન્યથા પરિભાષેયં મોક્ષશાસ્ત્રે ભવેદ્વૃથા ॥ ૩॥

યદ્વા પરોક્ષવાદેન પરમપ્રિયતામયે ।
રૂપિકા સુખગીઃ પુંસિ વિભુત્વાય્યૈ સ્વશબ્દવત્ ॥ ૪॥

નાનન્દં ન નિરાનન્દમિત્યાદિશ્રુતિભિઃ સ્ફુટમ્ ।
આત્મન્યાનન્દરૂપત્વનિષેધાદ્યુક્તિસંયુતાત્ ॥ ૫॥

ઉપાસાદ્યર્થશૂન્યત્વાન્નેતિ નેતિ શ્રુતેસ્તથા ।
નિષેધવાક્યં બલવદ્વિધિવાક્યાદિતિ સ્થિતિઃ ॥ ૬॥

નિર્નિરાનન્દમિતિ ચ સ્વોપાધ્યાનન્દભોક્તૃતામ્ ।
સ્વામિત્વરૂપિણીં વક્તિ ન નિર્ધન ઇતીવ હિ ॥ ૭॥

પ્રેયોઽન્યસ્માચ્ચ સર્વસ્માદિતિ શ્રુત્યા સુખાદપિ ।
ઉક્ત આત્મા પ્રિયસ્તસ્ય સુખત્વોક્તિશ્ચ નોચિતા ॥ ૮॥

આનન્દાદ્યાઃ પ્રધાનસ્ય ઇતિ વેદાન્તસૂત્રતઃ ।
વેદાન્તેઽપિ ન સિદ્ધાન્ત આત્મનઃ સુખરૂપતા ॥ ૯॥

વિસ્તારાદ્બ્રહ્મમીમાંસાભાષ્યેઽસ્માભિઃ પરીક્ષિતમ્ ।
ચિતેરસુખરૂપત્વં પ્રેમા વ્યાખ્યાયતેઽધુના ॥ ૧૦॥

મા ન ભૂવમહં શશ્વદ્ભૂયાસમિતિ રૂપકઃ ।
નિર્નિમિત્તોઽનુરાગો યઃ સ પ્રેમા પરમશ્ચિતિ ॥ ૧૧॥

અન્યાશેષતયા બુદ્ધેઃ સ્નેહોઽયં ન સુખેષ્વપિ ।
અતઃ પ્રિયતમઃ સ્વાત્મા નાન્યોઽતો હ્યધિકઃ પ્રિયઃ ॥ ૧૨॥

આત્મત્વેનાત્મનિ પ્રેમા ન સુખત્વાદ્યપેક્ષતે ।
અહં સ્યામિતિ ચેદ્યસ્માત્ સુખં સ્યામિતિ નેષ્યતે ॥ ૧૩॥

તથા ચ સુખતાદુઃખાભાવતે વાઽઽત્મતાઽપિ ચ ।
પ્રેમ્ણિ પ્રયોજિકા સિદ્ધા સ્વતઃપ્રેમાત્મતૈવ તુ ॥ ૧૪॥

તસ્માદ્વસ્તુત આત્મૈવ પ્રિયો નૈપાધિકત્વતઃ ।
ઔપાધિકીતરપ્રીતિરસ્થિરત્વાન્ન તાત્ત્વિકી ॥ ૧૫॥

પ્રીતિરન્યત્ર ચાનિત્યાવિવેકાદ્યૈઃ સુખાદિષુ ।
આત્મપ્રીતિસ્તુ નિત્યાઽતો નિત્યાનન્દઃ પુમાન્ મતઃ ॥ ૧૬॥

આત્મનઃ પ્રિયતાં બુદ્ધિર્યદિ પશ્યેત્ સમાહિતા ।
સર્વાતિશાયિનીં તર્હિ સુખાબ્ધૌ કિં ન મજ્જતિ ॥ ૧૭॥

પ્રિયદર્શનતો બુદ્ધેઃ સુખં લોકેષુ દૃશ્યતે ।
અતોઽનુમેયં પરમપ્રિયદૃષ્ટ્યા પરં સુખમ્ ॥ ૧૮॥

આત્માર્થત્વેન સર્વત્ર પ્રીતિરાત્મા સ્વતઃ પ્રિયઃ ।
ઇતિ શશ્વચ્છ્રુતિઃ પ્રાહ આત્મદૃષ્ટિવિધિત્સયા ॥ ૧૯॥

તતોઽપ્યનુપમં જ્ઞેયં પ્રિયાત્મેક્ષણતઃ સુખમ્ ।
ભુઞ્જતે તત્ સુખં ધીરા જીવન્મુક્તા મહાધિયઃ ॥ ૨૦॥

અન્તરાત્મસુખં સત્યમવિસંવાદિ યોગિનમ્ ।
અપશ્યન્ કૃપણો બાહ્યસુખાર્થી વઞ્ચિતો જનઃ ॥ ૨૧॥

સુખાશયા બહિઃ પશ્યન્ દેહી હીન્દ્રિયરન્ધ્રકૈઃ ।
વાતાયનૈર્ગૃહીત્વાઽન્તઃ સુખં વેત્તિ ન બાહ્યદૃક્ ॥ ૨૨॥

દુખલભ્યાન્ દુઃખમયાન્ પરિણામેઽતિદુઃખદાન્ ।
વિષયોત્થાન્ સુખાભાસાન્ ધિક્ સ્વાત્મસુખરોધકાન્ ॥ ૨૩॥

ઇતિ શ્રીવિજ્ઞાનભિક્ષુવિરચિતે સાઙ્ખ્યસારે આત્માનાત્મનોઃ
પ્રિયાપ્રિયત્વવૈધર્મ્યપરિચ્છેદઃ ॥ *॥

———————-

અથ પઞ્ચમઃ પરિચ્છેદઃ ।

પરિચ્છેદત્રયેણોક્તં સચ્ચિદાનન્દરૂપકમ્ ।
ગીયમાનં શ્રુતિસ્મૃત્યોરાત્મનો લક્ષણત્રયમ્ ॥ ૧॥

તદ્વૈપરીત્યમન્યેષાં લક્ષણં ચેરિતં સ્ફુટમ્ ।
આભ્યાં તુ ગુણદોષાભ્યાં વિવેકો દોષહૃત્ પરઃ ॥ ૨॥

નૈર્ગુણ્યસગુણત્વાદિવૈધર્મ્યાણ્યપરાણ્યપિ ।
બહૂનિ વક્ષ્યે સઙ્ક્ષેપાત્ પુમ્પ્રકૃત્યોરતઃ પરમ્ ॥ ૩॥

ધિયોઽર્થાકારયા વૃત્ત્યા જનિતત્વાત્ સુખાદયઃ ।
સામાનાધિકરણ્યેન કલ્પ્યન્તે લાઘવાદ્ ધિયામ્ ॥ ૪॥

મહદાદેર્જડત્વેન તદ્ધેતુશ્ચ જડો મતઃ ।
કાર્યકારણસાજાત્યં દૃષ્ટં લોકે હિ સર્વતઃ ॥ ૫॥

અત આત્મા બોધમાત્રતયા સિધ્યતિ લાઘવાત્ ।
ગુણાઃ સર્વે પ્રકૃત્યાદેર્વિકારાશ્ચેતરેઽખિલાઃ ॥ ૬॥

આત્મા તુ નિર્ગુણસ્તદ્વત્ કૂટસ્થશ્ચ મતો બુધૈઃ ।
ચિતેઃ કૂટસ્થસઞ્જ્ઞા તુ સ્થિરત્વાદ્ ગિરિકૂટવત્ ॥ ૭॥

લેપશ્ચેતરસમ્બન્ધે તદ્રૂપૈરુપરક્તતા ।
યથા વિષયસમ્બન્ધાદ્બુદ્ધૌ ભવતિ વાસના ॥ ૮॥

ભાણ્ડાદૌ દ્રવ્યયોગાચ્ચ તત્તદ્દ્રવ્યસ્ય વાસના ।
લેપહેતુશ્ચ સમ્બન્ધઃ સઙ્ગઃ સમ્બન્ધિ ચાઞ્જનમ્ ॥ ૯॥

અતો નિરઞ્જનોઽસઙ્ગો નિર્લેપશ્ચોચ્યતે પુમાન્ ।
નભઃપુષ્કરપત્રાદિદૃષ્ટાન્તૈઃ પરમર્ષિભિઃ ॥ ૧૦॥

ચિન્માત્રાનન્તશક્ત્યબ્ધૌ પુમર્થપવનેરિતાઃ ।
સત્ત્વાદિશક્તયો યાન્તિ વિશ્વબુદ્બુદરૂપતામ્ ॥ ૧૧॥

અત ઈશશ્ચિદાત્મૈવ જગતઃ સન્નિધાનતઃ ।
મણિવત્ પ્રેરકત્વેન જડાનામયસામિવ ॥ ૧૨॥

પુમાનેવ જગત્કર્તા જગદ્ભર્તાઽખિલેશ્વરઃ ।
સ્વામ્યર્થે મૃત્યવદ્યસ્માજ્જડવર્ગઃ પ્રવર્તતે ॥ ૧૩॥

કરણાનિ ચ દેહેષુ રાજાર્થમધિકારિવત્ ।
ભોગ્યજાતં મનોમન્ત્રિણ્યર્પયન્તિ સ્વભાવતઃ ॥ ૧૪॥

તૈર્ભોગ્યૈર્યુક્તમાત્માનમાવેદયતિ ધીશ્ચિતિ ।
ઈક્ષામાત્રેણ તદ્ભુઙ્ક્તે રાજેવાત્માઽખિલેશ્વરઃ ॥ ૧૫॥

ધનાદેરીશ્વરો દેહો દેહસ્યેન્દ્રિયમીશ્વરમ્ ।
ઇન્દ્રિયસ્યેશ્વરી બુદ્ધિર્બુદ્ધેરાત્મેશ્વરઃ પરઃ ॥ ૧૬॥

કૂટસ્થસ્યેશ્વરસ્યાન્યો નાસ્તિ પ્રેરક ઇત્યતઃ ।
ઈશ્વરસ્યાવધિત્વેન દ્રષ્ટા વૈ પરમેશ્વરઃ ॥ ૧૭॥

અન્યસ્યાગન્તુકૈશ્વર્યં બહુવ્યાપારસઙ્કુલમ્ ।
નિર્વ્યાપારસ્ય નિર્દોષમનાદ્યૈશ્વર્યમાત્મનઃ ॥ ૧૮॥

સર્વશક્તિમયો હ્યાત્મા શક્તિમણ્ડલતાણ્ડવઃ ।
સંસારં તન્નિવૃત્તિં ચ માયયાઽઽપ્નોતિ હેલયા ॥ ૧૯॥

સર્વાતિશાયિ નિર્દોષમૈશ્વર્યમિદમાત્મનઃ ।
પશ્યતો યોગિનો બ્રાહ્મમપ્યૈશ્વર્યં તૃણાયતે ॥ ૨૦॥

બાહ્યસ્યાત્મોચ્યતે દેહો દેહસ્યાત્મેન્દ્રિયાણિ ચ ।
બુદ્ધિરાત્મેન્દ્રિયાન્તસ્ય બુદ્ધેરાત્મા તુ ચિન્નભઃ ॥ ૨૧॥

અત આત્માવધિત્વેન પરમાત્મોચ્યતે ચિતિઃ ।
તથાઽન્તઃકરણૈર્યોગાજ્જીવ ઇત્યુચ્યતે ચિતિઃ ॥ ૨૨॥

અવિદ્યાકાર્યરહિતઃ પરમાત્મનિ ચ સ્મૃતિઃ ।
યસ્ય યદ્વ્યાપકં તસ્ય તદ્બ્રહ્માઽતો ધરાદિકમ્ ॥ ૨૩॥

પ્રકૃત્યન્તં ભવેદ્બ્રહ્મ સ્વસ્વકાર્યાદ્યપેક્ષયા ।
સેશ્વરે સાઙ્ખ્યવાદેઽપિ ચિતેરેવાનુમન્યતે ॥ ૨૪॥

પરે વા પરમાત્મત્વાદિકં તુ ન જડે ક્વચિત્ ।
અધ્યક્ષવ્યાપકત્વાભ્યાં પરં બ્રહ્મ તુ ચેતનઃ ॥ ૨૫॥

તસ્યાધ્યક્ષં વ્યાપકં ચ ન હેતુવિધયાઽસ્તિ હિ ।
અસઙ્ખ્યાત્મા નભોરાશિરવિભક્તૈકરૂપકઃ ॥ ૨૬॥

સોઽતશ્ચિદ્ઘનવિજ્ઞાનઘનાત્મઘનસંજ્ઞકઃ ।
પ્રકાશસ્યાનપેક્ષત્વાત્ સ્વસ્ય દ્રષ્ટૃતયાઽપિ ચ ॥ ૨૭॥

સ્વપ્રકાશઃ પુમાનુક્ત ઇતરે તદ્વિલક્ષણાઃ ।
ભોગોઽભ્યવહૃતિઃ સા ચ કૂટસ્થે નાસ્તિ ધીષ્વિવ ॥ ૨૮॥

ધીવૃત્તિપ્રતિબિમ્બાખ્યગૌણભોગા તુ ભોક્તૃતા ।
સાક્ષાદ્ધીવૃતિદ્રષ્ટૃત્વાદ્ બુદ્ધિસાક્ષ્યુચ્યતે પુમાન્ ॥ ૨૯॥

વિના વિકારં દ્રષ્ટૃત્વાત્ સાક્ષી તૂક્તોઽખિલસ્ય સઃ ।
ચૈત્યોપરાગરૂપત્વાત્ સાક્ષિતાઽપ્યધ્રુવા ચિતઃ ॥ ૩૦॥

ઉપલક્ષણમેવેદમપિ વ્યાવૃત્તયે જડાત્ ।
અતઃ પુમાનનિર્દેશ્યોઽણુશ્ચ સૂક્ષ્મશ્ચ કથ્યતે ॥ ૩૧॥

વિના દૃશ્યમદૃશ્યત્વાદવ્યક્તશ્ચોચ્યતે સતઃ ।
અદૃશ્યો દૃશ્યતે રાહુર્ગૃહીતેન યથેન્દુના ॥ ૩૨॥

અદૃશ્યં ચાસ્યમાદર્શે ચિત્ તથા સ્વસ્વબુદ્ધિષુ ।
ચિતિ વિશ્વસ્ય સઙ્ગશ્ચેદ્ વિશ્વં ભાસેત સર્વદા ॥ ૩૩॥

વિશ્વાધારોઽપ્યતઃ શૂન્યમિતિ ચિદ્ધીયતે ખવત્ ।
દૃશ્યદોષાન્ મૃષાબુદ્ધિર્દૃષ્ટ્યારોપ્ય નિર્મલે ॥ ૩૪॥

આદર્શે મલવદ્વ્યોમ્નિ દોષદૃષ્ટ્યા તુ તપ્યતે ।

વસ્તુતશ્ચિતિ નાસ્ત્યેવ મલો દૃશ્યાશ્રિતઃ સદા ॥ ૩૫॥

અતશ્ચ નિર્મલઃ સ્વસ્થો નિર્દોષશ્ચોચ્યતે પુમાન્ ।
સજાતીયેષુ વૈધર્મ્યલક્ષણા નાસ્તિ યદ્ભિદા ॥ ૩૬॥

અત આત્મા સમઃ પ્રોક્ત ઐકરૂપ્યાચ્ચ સર્વદા ।
દેહાધ્યક્ષતયા દેહી પુર્યભિવ્યક્તિતઃ પુમાન્ ॥ ૩૭॥

એકાકિએવાદદ્વિતીયઃ કેવલશ્ચોચ્યતે તુ સઃ ।
ચિચ્છક્ત્યપ્રતિબન્ધેન પ્રોચ્યતેઽનાવૃતઃ પુમાન્ ॥ ૩૮॥

સર્વસ્વામિતયા ચાત્મા ક્ષેત્રજ્ઞઃ ક્ષેત્રવેદનાત્ ।
હૃત્સરોવરધીપદ્મદલવૃત્તિષુ લીલયા ॥ ૩૯॥

ચરન્નિવાનન્દમીનાન્ ભુઞ્જાનો હંસ ઉચ્યતે ।
હકારેણ બહિર્યાતિ સકારેણ વિશન્ પુનઃ ॥ ૪૦॥

પ્રાનવૃત્ત્યાઽનય ચાપિ પ્રાણ્યાત્મા હંસ ઉચ્યતે ।
શરીરાગરિહૃદ્વ્યામગુહાયાં બુદ્ધિભાર્યયા ॥ ૪૧॥

વ્યજ્યમાનસ્તયા સાર્ધં સ્વપન્નિવ ગુહાશયઃ ।
ત્રિગુણાત્મકમાયાં સ્વાં સાન્નિધ્યાત્ પરિણામયન્ ॥ ૪૨॥

માયીતિ કથ્યતે ચાત્મા તત્કૃતાનૃતવેષધૃક્ ।
સ્વાન્યેકાદશ ભૂતાનિ પઞ્ચૈતાનિ તુ ષોડશ ॥ ૪૩॥

પુંસઃ કલાસ્તત્ત્વતસ્તુ નિરંશત્વાત્ સ નિષ્કલઃ ।
અહંશબ્દઃ સ્વામિવાચી સ્વામી સાક્ષી તુ ચેતસઃ ॥ ૪૪॥

અતોઽહમિતિ શબ્દેન ચિન્માત્રં પ્રોચ્યતે બુધૈઃ ।
સર્વેશ્વરઃ સર્વવેત્તા સર્વકર્તાઽદ્વયઃ પુમાન્ ॥ ૪૫॥

સામાન્યાદુચ્યતે યદ્વદ્ રાજા સર્વનરાધિપઃ ।
આત્માદ્વૈતસ્ય સૂત્રેણ જાતિમાત્રેણ વર્ણનાત્ ॥ ૪૬॥

પ્રલયે હિ વિજાતીયદ્વૈતશૂન્યત્વમાત્મનામ્ ।
અસઙ્ગત્વાન્નિત્યશુદ્ધો નિત્યબુદ્ધશ્ચ ચિત્ત્વતઃ ॥ ૪૭॥

નિત્યમુક્તસ્તથા નિત્યનિર્દુઃખત્વાત્ પુમાન્ મતઃ ।
ઇત્યાદુગુરુશાસ્ત્રોક્તદિશા સ્વાનુભવેન ચ ॥ ૪૮॥

વૈધર્મ્યાદાત્મનોઽનાત્મવિવેકઃ ક્રિયતાં બુધૈઃ ।
પરિચ્છેદચતુષ્કેણ પુમ્પ્રકૃત્યોઃ સુવિસ્તરાત્ ।
વૈધર્મ્યગણ ઉક્તોઽયં ધ્યાયિનામાશુ મુક્તિદઃ ॥ ૪૯॥

ઇતિ શ્રીવિજ્ઞાનભિક્ષુવિરચિતે સાઙ્ખ્યસારે આત્મવૈધર્મ્યગણપરિચ્છેદઃ
॥ *॥

————————-

અથ ષષ્ઠઃ પરિચ્છેદઃ ।

વિવેકમેવ સદ્યુક્ત્યા મત્વા તદનુભૂયતે ।
રાજયોગં યથા કુર્યાત્ સમાસેન તદુચ્યતે ॥ ૧॥

અશક્તો રાજયોગસ્ય હઠયોગેઽધિકારવાન્ ।
વાસિષ્ઠે ચ વસિષ્ઠાય ભુસુણ્ડેનૈવમીરિતમ્ ॥ ૨॥

જ્ઞાનાવૃત્તી રાજયોગે પ્રાણાયમાસને હઠે ।
મુખ્યે તેઽઙ્ગતયાઽન્યોન્યં સેવ્યે શક્ત્યનુસારતઃ ॥ ૩॥

વિષયેઽનન્તદોષા યે શ્રુતિસ્મૃતિસમીરિતાઃ ।
ત આદૌ પરિદ્રષ્ટવ્યાશ્ચિત્તસ્થૈર્યાય યોગિભિઃ ॥ ૪॥

કામબીજાન્યનન્તાનિ સમ્પ્રરોહન્તિ યદ્ધૃદિ ।
તત્રાટવીનિભે જ્ઞાનપુણ્યસસ્યં ન વર્ધતે ॥ ૫॥

દોષદૃષ્ટ્યગ્નિસન્દગ્ધે કામબીજે તુ ચેતસિ ।
ગુરુશાસ્ત્રહલૈઃ કૃષ્ટે સુક્ષેત્રે તદ્વિવર્ધતે ॥ ૬॥

સત્યેષ્વસત્તાં પ્રચુરાં તથા રમ્યેષ્વરમ્યતામ્ ।
સુખેષુ પ્રચુરં દુઃખં પશ્યન્ ધીરો વિરજ્યતે ॥ ૭॥

બ્રહ્મલોકોઽપિ નરકો વિનાશામેધ્યપૂરિતઃ ।
યુક્તશ્ચ સ્વાધિકૈરન્યૈસ્ત્રૈગુણ્યાદપિ દુઃખયુક્ ॥ ૮॥

તત્રત્યૈરપિ મુક્ત્યર્થં યત્યતે જન્મભીરુભિઃ ।
અતો જ્ઞેયઃ સમાસેન લોકઃ સર્વોઽપિ દુઃખયુક્ત્ ॥ ૯॥

ઇદં મે સ્યાદિદં મા સ્યાદિતીચ્છાવ્યથિતં મનઃ ।
સ્વભાવાત્ તેન વિજ્ઞેયં દુઃખં ચિત્તેન સઙ્ગતિઃ ॥ ૧૦॥

સુખં સુષુપ્તિઃ પરમા દુઃખં વિષયવેદનમ્ ।
સુખદુઃખસમાસોઽયં કિમન્યૈર્બહુભાષિતૈઃ ॥ ૧૧॥

તસ્માદનર્થાનર્થાભાન્ પરીક્ષ્ય વિષયાન્ સુધીઃ ।
ઉત્સૃજેત્ પરમાર્થાર્થી બાલરમ્યાનહીનિવ ॥ ૧૨॥

ઇત્યાદિકાનન્તદોષદૃષ્ટ્યા રાગસ્ય તાનવે ।
માયાવિવેકતઃ શુદ્ધમાત્માનં ચિન્તયેત્ સદા ॥ ૧૩॥

ઇદં તદિતિ નિર્દેષ્ટું ગુરુણાઽપિ ન શક્યતે ।
ઉદાસીનસ્યાત્મતત્ત્વં સ્વયમેવ પ્રકાશતે ॥ ૧૪॥

બુદ્ધિબોધાત્મકો બુદ્ધિસાક્ષી બુદ્ધેઃ પરો વિભુઃ ।
કૂટસ્થોઽહં ચિદાદિત્ય ઇત્યેકાગ્રોઽનુચિન્તયેત્ ॥ ૧૫॥

વૃત્તિબોધો ઘટચ્છિદ્રમિવ નાશ્યલ્પ ઈક્ષ્યતે ।
વસ્તુતો વૃત્તિબોધોઽહં પૂર્ણો વ્યોમવદક્ષયઃ ॥ ૧૬॥

અન્તર્યદ્ દૃશ્યતે સર્વં તદ્બુદ્ધેર્વૃત્તિરુચ્યતે ।
તેભ્યો દુઃખાત્મકેભ્યોઽહં સાક્ષાત્ તદ્વીક્ષિતા પૃથક્ ॥ ૧૭॥

કર્મકર્તૃવિરોધો હિ વૃત્ત્યા વૃત્તિપ્રકાશને ।
વૃત્તિધારાકલ્પને ચ ગૌરવાદિતિ નિશ્ચિતમ્ ॥ ૧૮॥

હર્ષશોકભયક્રોધલોભમોહમદૈસ્તથા ।
દ્વેષાભિમાનકાર્પણ્યનિદ્રાલસ્યસ્મરાદિભિઃ ॥ ૧૯॥

ધર્માધર્મૈશ્ચ સમ્પૂર્ણા બુદ્ધિર્દુઃખમયી તુ મે ।
આત્માનં દર્શયત્યેવ ભાસ્કરાયેવ રોગિણઃ ॥ ૨૦॥

અહં સર્વગતં શાન્તં પરમાત્મઘનં શુચિ ।
અચિન્ત્યચિન્માત્રનભો વિશ્વદર્પણમક્ષયમ્ ॥ ૨૧॥

નિરઞ્જનં નિરાધારં નિર્ગુણં નિરુપદ્રવમ્ ।
નિર્વિશેષં સજાતીયાત્ સમસ્તાર્થાવભાસકમ્ ॥ ૨૨॥

બ્રહ્મવિષ્ણુમહેશાદ્યાઃ સ્થાવરાન્તાશ્ચ ચેતનાઃ ।
અવૈધર્મ્યાત્મકાભેદાદહમિત્યનુચિન્તયેત્ ॥ ૨૩॥

અહમન્યે ચ પુરુષાઃ સમચિદ્વ્યોમરૂપિણઃ ।
અત આત્મૈક એવાઽહમિતિ શ્રુતિષુ ગીયતે ॥ ૨૪॥

ઇતિ પશ્યન્ સ્વભોગૈશ્ચ યોગી વિશ્વં પ્રપૂજયેત્ ।
આત્મયોગોઽપ્યયં પ્રોક્તઃ શ્રુત્યુક્તઃ સાઙ્ખ્યયોગિનામ્ ॥ ૨૫॥

સર્વભૂતસ્થમાત્માનં સર્વભૂતાનિ ચાત્મનિ ।
સમં પશ્યન્નાત્મયાજી સ્વારાજ્યમધિગચ્છતિ ॥ ૨૬॥

ઇત્યેવં મનુનાઽપ્યાત્મયાગો જ્ઞાનાઙ્ગમીરિતઃ ।
તસ્માદભયદાનેન સ્વભોગાદ્યર્ચનેન ચ ॥ ૨૭॥

સમ્માનયન્ ભૂતજાતમાત્માનમનુચિન્તયેત્ ।
બ્રહ્મવિષ્ણુશિવાદીનાં ભોગે રાગશ્ચ હીયતે ॥ ૨૮॥

તેષાં સ્વસામ્યદૃષ્ટ્યાઽતઃ સામ્યં યોગી વિચિન્તયેત્ ।
ઉત્પત્તૌ પ્રલયે ચૈવ સર્વાવસ્થાસુ સર્વદા ॥ ૨૯॥

સર્વેષામેકરૂપત્વં દ્રષ્ટૂ રાગાદિકં કુતઃ ।
વિષ્ણ્વાદયો મહૈશ્વર્યં ભુઞ્જ ના અપિ નાધિકા ॥ ૩૦॥

મત્તોઽતોઽલં તદૈશ્વર્યૈરવિવેકિજનપ્રિયૈઃ ।
ગુણકર્માદિભિઃ કિઞ્ચિન્નિરીક્ષ્યાધિકમાત્મનઃ ॥ ૩૧॥

તદર્થં યતતે લોકો નાહં પશ્યામિ મેઽધિકમ્ ।
તથા ન્યૂનં ન પશ્યામિ યદતિક્રમશઙ્કયા ॥ ૩૨॥

દેવા દૈત્યજયાયેવ યતિષ્યે તજ્જયાશયા ।
અહં યથા તથૈવાન્યે આબ્રહ્મા નારકા જનાઃ ॥ ૩૩॥

દૃશ્યન્તે સ્વાત્મવત્ પ્રેમ્ણા પિતૃભ્રાતૃસુતાદિવત્ ।
ક ઈશ ઈશિતવ્યો વા કઃ શ્રેષ્ઠઃ કોઽધમોઽપિ વા ॥ ૩૪॥

અભિન્ને ભેદદૃષ્ટ્યા સ્યાન્મૃત્યોર્ભયમિતિ શ્રુતિઃ ।
ચિદ્વ્યોમસ્વેકરૂપેષુ ઈશાનીશાદિરૂપકઃ ॥ ૩૫॥

રૂપભેદો હ્યસન્ સર્વઃ સ્ફટિકે રૂપભેદવત્ ।
ધિયાં રૂપૈઃ પુમાનેકો બહુરૂપ ઇવેયતે ॥ ૩૬॥

વૃકચર્માદિરૂપાદ્યૈર્માયીવ બહુરૂપધૃક્ ।
મામાલિઙ્ગ્ય નિરાકારં વિવિધાકારધારિણી ॥ ૩૭॥

માયૈવૈકા હિ નૃત્યન્તી મોહયત્યખિલા ધિયઃ ।

પુંસાં ભેદો બુદ્ધિભેદાદમ્બુભેદાદ્યથા રવેઃ ॥ ૩૮॥

વ્યોમ્નશ્ચ છિદ્રરૂપેણ ભેદઃ કુમ્ભાદિભેદતઃ ।
અતઃ શુદ્ધો બુદ્ધમુક્તઃ સર્વદા સર્વગોઽવ્યયઃ ॥ ૩૯॥

અહમન્યે ચ તત્રાઽહો શત્રુમિત્રાદિધીર્મૃષા ।
બ્રહ્મણીશે હરાવિન્દ્રે સર્વભૂતગણે તથા ॥ ૪૦॥

ઉત્તમાધમમધ્યત્વવિભાગો માયયા મૃષા ।
ત્રિગુણાત્મકમાયાયાસ્ત્રૈવિદ્યાદાત્મનોઽપિ હિ ॥ ૪૧॥

ઉત્તમાધમમધ્યત્વત્રૈવિધ્યં નૈવ હિ સ્વતઃ ।
યથા દેહે તથાઽન્યત્ર ચિત્પ્રકાશોઽયમવ્યયઃ ॥ ૪૨॥

વ્યક્તતાવ્યક્તતામાત્રભેદો હ્યન્તરબાહ્યયોઃ ।
એવમન્યેઽપિ પુરુષા બદ્ધમુક્તાવિશેષતઃ ॥ ૪૩॥

ઈશાનીશાવિશેષાચ્ચ પુરુષાર્થો ન મેઽસ્ત્યતઃ ।
મહાનિદ્રૈવ મે સાધ્વી દુઃખભોગહરા પ્રિયા ॥ ૪૪॥

અપ્રિયા મૂઢચિત્તાનામસાધ્વી ધીહતાત્મનામ્ ।
ચિદાદર્શે મયિ ધિયો યદ્યપિ પ્રતિબિમ્બનમ્ ॥ ૪૫॥

તત્ત્વતો નૈવ દોષાય તથાઽપિ ત્યાજ્યમેવ તત્ ।
સ્વભાવાદસ્ય હેયત્વં સ્વાનુભૂત્યા હિ સિધ્યતિ ॥ ૪૬॥

યથા કોઽપિ પરસ્યાપિ વૈરૂપ્યં ન દિદૃક્ષતિ ।
સ્વામિન્યારોપ્યાત્મદોષાન્ સાધ્વીયમનુતપ્યતે ॥ ૪૭॥

નિર્દોષં સ્વામિનં દૃષ્ટ્વા નિર્દોષા સ્યાત્ પતિવ્રતા ।
એવમસ્યા રૂપભેદેઽપ્યેકરૂપોઽસ્મિ સર્વદા ॥ ૪૮॥

ભુઞ્જાનો વાઽપ્યભુઞ્જાનસ્તાં મદર્થામનન્યગામ્ ।
યથૈકરૂપતોપાધિયોગાયોગદશાસ્વહો ॥ ૪૯॥

આદર્શસ્યામલસ્યૈવ ચિન્નભોદર્પણસ્ય મે ।
દૃશ્યબુદ્ધિગતા દોષાઃ સાક્ષાત્તદ્દ્રષ્ટરિ પ્રભૌ ॥ ૫૦॥

ન સન્તિ મયિ મોહાદ્યા ભાસ્કરે ભાસ્યદોષવત્ ।
દુઃખૈર્બદ્ધા સ્વમાત્માનં ત્યક્ત્વા મદ્ભાવમાગતા ॥ ૫૧॥

મુચ્યતે દુઃખબન્ધાદ્ધીર્ન મે મોક્ષો ન બન્ધનમ્ ।
કૂટસ્થાસઙ્ગચિદ્વ્યોમ્નિ ધીદુઃખપ્રતિબિમ્બનમ્ ॥ ૫૨॥

યોઽન્યો બન્ધો ભોગરૂપઃ સોઽપિ ચિદ્દર્પણે મૃષા ।
જાગ્રદાદિત્રયાવસ્થાસાક્ષી તાભિર્વિવર્જિતઃ ॥ ૫૩॥

અહં પૂર્ણશ્ચિદાદિત્ય ઉદયાસ્તવિવર્જિતઃ ।
દર્પણે મુખવદ્વિશ્વં મયિ બોધે ન તાત્ત્વિકમ્ ॥ ૫૪॥

વિભુત્વે ચ બાહ્યાન્તઃ સુષુપ્ત્યાદાવદર્શનાત્ ।
મયિ વાઽન્યત્ર વા પુંસિ કેવલાનુભવે વિભૌ ॥ ૫૫॥

ભાતિ યત્તદ્વિવર્ત્તો ધીપ્રતિબિમ્બાત્મકત્વતઃ ।
શુક્તૌ રજતવદ્ વિશ્વમતો મયિ ન દોષકૃત્ ॥ ૫૬॥

મરીચૌ તોયવત્ તદ્વદ્વ્યોમાદૌ નગરાદિવત્ ।
કાલત્રયેઽપિ નાસ્ત્યેવ મયિ વિશ્વં સનાતને ॥ ૫૭॥

અન્યત્રાસ્ત્વથવા માઽસ્તુ બુદ્ધ્યાદૌ મમ તેન કિમ્ ।
મયિ સર્વં યથા વ્યોમ્નિ સર્વત્રાહં યથા નભઃ ॥ ૫૮॥

ન સર્વં મયિ સર્વત્ર નાહં ચાલેપતઃ ખવત્ ।
અત એવાવિભાગાખ્યાભેદેન ક્ષીરનીરવત્ ॥ ૫૯॥

જ્ઞાનાત્મકમિદં વિશ્વં ગાયન્તિ પરમર્ષયઃ ।
જગન્મમ મદર્થત્વાન્મચ્છરીરસુખાદિવત્ ॥ ૬૦॥

યથ મમ તથાઽન્યેષાં મમૈવેતિ ધિયો ભ્રમઃ ।
વસ્તુતસ્તુ ન કસ્યાપિ કિમપિ વ્યભિચારતઃ ॥ ૬૧॥

સ્વામિત્વસ્યાધ્રુવત્વેન પાન્થસ્યાવાસગેહવત્ ।
એકં ચિન્માત્રમસ્તીહ શુદ્ધં શૂન્યં નિરઞ્જનમ્ ॥ ૬૨॥

સૂક્ષ્માત્ સૂક્ષ્મતરં તત્ર ન જગન્ન જગત્ક્રિયા ।
દૃશ્યતે સર્વદૃશ્યાઢ્યા સ્વસ્વબુદ્ધિપરમ્પરા ॥ ૬૩॥

ચિન્મણ્ડલમહાદર્શે પ્રતિબિમ્બમુપાગતા ।
ક્વચિદ્વ્યક્તં ક્વચિત્ સૂક્ષ્મં નભઃ સર્વત્ર તિષ્ઠતિ ॥ ૬૪॥

યથા તથા ચિદાકાશં ધીદેશેઽન્યત્ર ચ સ્થિતમ્ ।
ચિદાકાશમયં વિશ્વં યતોઽતો ધીરિતસ્તતઃ ॥ ૬૫॥

ભ્રમન્તી તત્ર તત્રૈવ ભાસતેઽર્કે ઘટાદિવત્ ।
ધર્માધર્મૌ જન્મમૃત્યૂ સુખદુઃખાદિ ચાખિલમ્ ॥ ૬૬॥

જાગ્રત્યપિ મૃષા સ્વપ્ન ઇવ જન્માદિકં મમ ।
દૃશ્યયોગવિયોગાભ્યાં ચિતો જન્મવિનાશધીઃ ॥ ૬૭॥

અભિવ્યક્ત્યનભિવ્યક્તિદોષાભ્યાં શશિનો યથા ।
મહાસુષુપ્તૌ ભવજન્મમૃત્યુ-
દુઃસ્વપ્નધારાઃ ક્ષણભઙ્ગુરા ધિયઃ ।
પશ્યામ્યહં તાભિરલિપ્તરૂપો
ઘનૈરૂર્તૈર્વિગતૈ રવેઃ કિમ્ ॥ ૬૮॥

ઇત્યેવં સતતં ધ્યાયન્નેકાગ્રમનસા સુધીઃ ।
સાક્ષાત્કરોત્યાત્મતત્ત્વં વાગગોચરરૂપતઃ ॥ ૬૯॥

સ્વરૂપં નિર્મલં શાન્તં મનસ્ત્યજતિ ચેત્ ક્ષણમ્ ।
તદૈવ દૃશ્યસંસ્કારશેષાત્ સઙ્ક્ષુભ્યતીન્દ્રિયમ્ ॥ ૭૦॥

ઉત્થિતનુત્થિતાંસ્તત્ર ઇન્દ્રિયારીન્ પુનઃ પુનઃ ।
વિવેકેનૈવ વજ્રેણ હન્યાદિન્દ્રો ગિરીનિવ ॥ ૭૧॥

ઇતિ શ્રીવિજ્ઞાનભિક્ષુવિરચિતે સાઙ્ખ્યસારે રાજયોગપ્રકારપરિચ્છેદઃ
॥ *॥

—————————-

અથ સપ્તમઃ પરિચ્છેદઃ ।

એવમાત્માનુભવિનો જીવન્મુક્તસ્ય લક્ષણમ્ ।
સ્પષ્ટં વક્ષ્યે ભવેદ્યેન જ્ઞાનાજ્ઞાનપરીક્ષણમ્ ॥ ૧॥

શ્રવણાન્ મનનાદ્વાઽપિ અન્યથાઽઽત્મજ્ઞતાભ્રમાત્ ।
કુર્યાદ્ગુરુમવિદ્વાંસં સ્યાચ્ચાજ્ઞો જ્ઞાભિમાન્યપિ ॥ ૨॥

નૈશ્વર્યાનાગતજ્ઞત્વાદિકં જ્ઞાનસ્ય લક્ષણમ્ ।
તદ્દૃતેઽપિ હિ કૈવલ્યં યોગભાષ્યકૃતેરિતમ્ ॥ ૩॥

શ્રૌતસ્માર્તાનિ વાક્યાનિ જ્ઞાનિનો મોક્ષભાગિનઃ ।
લક્ષકાણ્યેવ લિખ્યન્તે વિશ્વાસાતિશયાય વૈ ॥ ૪॥

યત્ર સર્વાણિ ભૂતાનિ આત્મૈવાભૂદ્ વિજાનતઃ ।
તત્ર કો મોહઃ કઃ શોક એકત્વમનુપશ્યતઃ ॥ ૫॥

યઃ સર્વત્રાનભિસ્નેહસ્તત્ તત્ પ્રાપ્ય શુભાશુભમ્ ।
નાભિનન્દન્તિ ન દ્વેષ્ટિ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ॥ ૬॥

ન વિસ્મરતિ સર્વત્ર યથા સતતગો ગતિમ્ ।
ન વિસ્મરતિ નિશ્ચેત્યં ચિન્માત્રં પ્રાજ્ઞધીસ્તથા ॥ ૭॥

નોદેતિ નાસ્તમાયાતિ સુખે દુઃખે મુખપ્રભા ।
યથાપૂર્વસ્થિતિર્યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૮॥

યો જાગર્ત્તિ સુષુપ્તસ્થો યસ્ય જાગ્રન્ન વિદ્યતે ।
યસ્ય નિર્વાસનો બોધઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯॥

રાગદ્વેષભયાદીનામનુરૂપં ચરન્નપિ ।
યોઽન્તર્વ્યોમવદત્યચ્છઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૦॥

યસ્ય નાહઙ્કૃતો ભાવો બુદ્ધિર્યસ્ય ન લિપ્યતે ।
કુર્વતોઽકુર્વતો વાઽપિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧॥

અપિ શીતરુચાવર્કે અત્યુષ્ણેઽપીન્દુમણ્ડલે ।
અપ્યધઃપ્રસવત્યગ્નૌ જીવન્મુતો ન ચાન્યધીઃ ॥ ૧૨॥

ચિદાત્મન ઇમા નિત્યમ્પ્રસ્ફુરન્તીહ શક્તયઃ ।
ઇત્યસ્યાશ્ચર્યજાલેષુ નાભ્યુદેતિ કુતૂહલમ્ ॥ ૧૩॥

પરવ્યસનિની નારી વ્યગ્રાઽપિ ગૃહકર્મણિ ।
તદેવાસ્વાદયત્યન્તર્નરસઙ્ગરસાયનમ્ ॥ ૧૪॥

એવં તત્ત્વે પરે શુદ્ધે ધીરો વિશ્રાન્તિમાગતઃ ।
તદેવાસ્વાદયત્યન્તર્બહિર્વ્યવહરન્નપિ ॥ ૧૫॥

યો નિત્યમધ્યાત્મમયો નિત્યમન્તર્મુખઃ સુખી ।
ગમ્ભીરશ્ચ પ્રસન્નશ્ચ ગિરાવિવ મહાહ્રદઃ ॥ ૧૬॥

પરાનન્દરસાક્ષુબ્ધો રમતે સ્વાત્મનાઽઽત્મનિ ।
સર્વકર્મપરિત્યાગી નિત્યહૃષ્ટો નિરામયઃ ॥ ૧૭॥

ન પુણ્યેન ન પાપેન નેતરેણાપિ લિપ્યતે ।
યેન કેન ચિદાચ્છન્નો યેન કેન ચિદાશિતઃ ॥ ૧૮॥

યત્ર ક્વચન શાયી ચ સ સમ્રાડિવ રાજતે ।
વર્ણધર્માશ્રમાચારશાસ્ત્રમન્ત્રનયેપ્સિતઃ ॥ ૧૯॥

નિર્ગચ્છતિ જગજ્જાલાત્ પઞ્જરાદિવ કેસરી ।
વાચામતીતવિષમો વિષયાશાદૃશેક્ષિતઃ ॥ ૨૦॥

કામપ્યુપગતઃ શોભાં શરદીવ નભસ્તલમ્ ।
નિઃસ્તોત્રો નિર્નમસ્કારઃ પૂજ્યપૂજાવિવર્જિતઃ ॥ ૨૧॥

સંયુક્તો વા વિયુક્તો વા સદાચારનયક્રમૈઃ ।
એતાવદેવ ખલુ લિઙ્ગમલિઙ્ગમૂર્ત્તેઃ
સંશાન્તસંસૃતિચિરભ્રમનિર્વૃત્તસ્ય ।
તદ્યસ્ય યન્મદનકોપવિષાદલોભ-
મોહાપદામનુદિનં નિપુણં તનુત્વમ્ ॥ ૨૨॥

તુર્યવિશ્રાન્તિયુક્તસ્ય પ્રતિતીપસ્ય ભવાર્ણવાત્ ।
ન કૃતેનાકૃતેનાર્થો ન શ્રુતિસ્મૃતિવિભ્રમૈઃ ॥ ૨૩॥

તનું તયજતુ વા તીર્થે શ્વપચસ્ય ગૃહેઽથવા ।
જ્ઞાનસમ્પ્રાપ્તિસમયે મુક્ત એવામલાશયઃ ॥ ૨૪॥

ન મોક્ષો નભસઃ પૃષ્ઠે ન પાતાલે ન ભૂતલે ।
સર્વાશાસઙ્ક્ષયે ચેતઃક્ષયો મોક્ષ ઇતિ શ્રુતેઃ ॥ ૨૫॥

જીવન્મુક્તપદં ત્યક્તા સ્વદેહે કાલસાત્કૃતે ।
વિશત્યદેહમુક્તત્વં પવનોઽસ્પન્દતામિવ ॥ ૨૬॥

અનાપ્તાખિલશૈલાદિપ્રતિબિમ્બે હિ યાદૃશી ।
સ્યાદ્દર્પણે દર્પણતા કેવલાત્મસ્વરૂપિણી ॥ ૨૭॥

અહં ત્વં જગદિત્યાદૌ પ્રશાન્તે દૃશ્યસમ્ભ્રમે ।
સ્યાત્ તાદૃશી કેવલતા સ્થિતે દ્રષ્ટર્યવીક્ષણે ॥ ૨૮॥

ચિન્માત્રં ચેત્યરહિતમનન્તમજરં શિવમ્ ।
અનાદિમધ્યનિલયં યદનાધિ નિરામયમ્ ॥ ૨૯॥

ન શૂન્યં નાપિ ચાકારં ન દૃશ્યં ન ચ દર્શનમ્ ।
અનાખ્યમનભિવ્યક્તં તત્ કિઞ્ચિદવશિષ્યતે ॥ ૩૦॥

ઇતિ શ્રીવિજ્ઞાનભિક્ષુવિરચિતે સાઙ્ખ્યસારે જીવન્મુક્તિપરમમુક્ત્યોઃ
પરિચ્છેદઃ ॥ * ॥

ઇતિ સાઙ્ખ્યસારસ્યોત્તરભાગઃ । સાઙ્ખ્યસારાખ્યં પ્રકરણં સમાપ્તમ્ ।

———————

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

---

*sA NkhyasAraH*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*